।। श्रीबालकृष्णाय नमः ।।

# ।। सटीक – बालकृष्ण – चम्पू – प्रारम्भः ।।

।। श्रीगुरुभ्यो नमः ।।

आकण्ठदन्ता वलमातुदन्तं विघ्नान्वहन्तं शुचिदन्तकुन्तम् ।। संसारवाराशिमुदन्तशेषं कुर्वन्तमीडे सकलेष्टदं तम्।। १।। कदाचित्कालिन्द्या विपिनभुवि राधा सहचरं चिरं तप्ता गोपीः कनकलतिकावेल्लिततनुम्।। तमालं मत्वा स्वं पुनरधिकतप्ता मृदु समाह्वयन्कृष्णस्तासां श्रममपनुदच्छं वितनुतात्।। २।। यन्नामतारकाद्यं ब्रह्मानन्देन चान्ततः पूर्णम्।। यत्र च वाणी सक्ता सदयं तमहं गुरुं नमस्यामि।। ३।। सत्कृष्णवर्त्मविलसत्सरसालवालः श्रीवल्लभाभिधजटः कुलकल्पशाखी।। श्रीविट्ठलाभिधभुजो हरिभक्तिवार्भिः सिक्तोऽनिशं विजयते भुवि दुःखहर्ता।। ४।। स सप्तशालो विलसत्प्रशाखः फुल्लोऽनिशं माधवसन्निधानात्।। स्वसन्निधानागतजीवसङ्घमामोदवन्तं कुरुतेऽतिमोदात्।। ५।। एतत्फलत्वेन विराजमानो यद्वाग्रसेष्वादरतो निरस्य।। लभ्यं फलं भूपतिपारिभद्रात्संसेव्यमानो बुधसद्द्विजेन्द्रैः।। ६।। साहित्यसङ्गीतकले तथा श्रीर्यस्मिन् सहावाससुखं भजन्ति।। वेदान्तवन्यां विहरन्मृगेन्द्रो वाग्वैभवैर्निर्जितवादिदन्ती।। ७।। स्वाचार्यवर्यप्रकटीकृतेन पुष्टय्ध्वना स्वाननुगृह्य सद्यः।। उद्धर्तुमेतान् भववार्धिमग्नान् श्रीजीवनेशोऽवततार लोके।। ८।। तदनुज्ञया तदीयं तात्पर्यं तन्मुखात्समाज्ञाय।। तत्कृतचम्पूबन्धे सरसे सालङ्कृतौ रसिकहृद्ये।। ९।। श्रीबालकृष्णपूर्वाभिख्ये टीकां सुगूढतात्पर्ये।। मञ्जर्यभिधां कर्तुं यत्नोऽयं मे न शेमुषीविभवात्।। १०।।



**श्रीमद्वृन्दावनाख्ये व्रजवरवनितावृन्दसम्वेष्टितोऽसौ**
**चन्द्रज्योत्स्नाविराजद्विपुलसुविपिने चञ्चरीकप्रघुष्टे ।।**
**स्वच्छैर्मुक्ताफलाभैस्सुललितरविजारेणुसङ्घैर्वलक्षे कुर्वन्**
**रासप्रमोदं प्रतिनिशमपि यो बालकृष्णोऽवतान्नः।। १।।**

अथ तत्र भवान् श्रीमद्वल्लभान्ववायकुमुदेन्दुः श्रीमज्जीवनाभिधानः सत्कविः प्रारीप्सितबालकृष्णचम्प्वाख्यप्रबन्धपरिसमाप्तिप्रचारादिप्रतिबन्धक–दुरितप्रशमनद्वारा निर्विघ्नतासिद्धये स्वाभीष्टदेवताकीर्त्तनपुरःसरमाशीरूपं मङ्गलमाचरति। **श्रीमदिति।** चन्द्रज्योत्स्नया चन्द्रिकया विराजच्छोभमानं विपुलं विशालं यत्सुविपिनं शोभनं वनं तस्मिन्। निशायां निशायामिति प्रतिनिशं सर्वदेत्यर्थः। लीलायाः नित्यत्वादिति भावः। रासप्रमोदं रासेन या सेवा, प्रमोदं गोपीनां प्रकृष्टं हर्षं कुर्वन्नपि यो बालश्चासौ कृष्णश्चेति तथाविध इति विरोधाभासः। परिहारस्तु। अबालकृष्ण इतिच्छेदात्। परब्रह्मत्वेन विरुद्धधर्माश्रयत्वाद्वा। असौ नन्दनन्दनोऽस्मानवताद्रक्षतात्। कीदृशः, व्रजसम्बन्धिन्यो या वराः श्रेष्ठा वनिता जनितात्यर्थानुरागाः स्त्रियो गोप्यस्तासां वृन्देन समूहेन सम्यग्वेष्टितः। एतेन जनितात्यन्तानुरागाभिस्ताभिः स्वाभाविकप्रेमवशात् स्वयमागत्य संवेष्टितत्वेन तन्मनोरथसिद्धये आप्तकामस्यापि क्रीडनं युज्यते इति ध्वनितम्। तदुक्तं श्रीमद्भागवते ''आत्मारामोऽप्यरीरमत्'' इति। **कीदृशे वने.....**

श्रीमद्वृंदावनाख्ये श्रीमति वृंदावननाम्नि ॥ तथा ॥ चंचरीकप्रघुष्टे भ्रमरझंकारसहिते ॥ घुष्टइत्यत्र घुषिरावशब्दनइतीण्निषेधः ॥ विशब्दनमभिप्रायाविष्करणं ततोन्यस्मिन्नर्थइत्यर्थः ॥ तथा ॥ स्वच्छैर्निर्मलैरतएव मुक्ताफलाभैर्मौक्तिकसदृशैः सुललितरविजारेणुसंघैः सुललितैरत्यंतरम्यै रविजाया यमुनायाः संबंधिभी रेणुसंघैः सूक्ष्मसिकतानिकरैर्वलक्षे धवले ॥ एतैर्विशेषणैः सकलरम्यवृक्षलतापुष्पादिपूर्णत्वनिर्मलत्वरम्यत्वमृदुलभूमित्वाद्यनेकोद्दीपकगुणविशिष्टत्वात्तादृक्प्रदेशस्य क्रीडायोग्यत्वं बोधितं ॥ भ्रमरश्चंचरीकः स्यादिति त्रिकांडशेषः ॥ वलक्षो धवलोऽर्जुनः॥ वनिता जनितात्यर्थानुरागायां च योषितीति चामरः स्रग्धरा वृत्तं ॥ म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमिति तल्लक्षणात् ॥ १ ॥

मायावादतमःप्रपाटनपटुं श्रीवल्लभाख्यं विभुं श्रीमल्लक्ष्मणभट्टवंशतरणिं श्रीविठ्ठलेशं प्रभुं॥ तद्घृष्ट्युच्चयरूपिणो हि निपुणान्प्रोल्लासने मानसे ज्ञानाब्जस्य नितांतकांतिरुचिरांस्तत्पुत्रपौत्रान्नुमः॥२॥

अथ यस्य देवेपरा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिताह्यर्थाः प्रकाशंते महात्मनइति श्वेताश्वतरश्रुतौ देवभक्तेरिव गुरुभक्तेरप्यावश्यकत्वकथनात् स्वपूर्वाचार्यवंदनमाचरति॥मायेति ॥वयं अस्मदोद्वयोश्चेति वचनाद्बहुवचनं ॥ बाह्याभ्यंतरतमोनाशनद्वारा परमब्रह्मसुखदातृत्वेन सर्वजनप्रियत्वादन्वर्थश्रीवल्लभाख्यं ॥ विभुंसर्वव्यापकपरमेश्वरावतारं॥तथा॥प्रभुं निग्रहानुग्रहसमर्थं॥विदा ज्ञानेन



ठाः ठो मंडले चंद्रबिंबे शून्ये चलोकगोचरइति मेदिनीकोशाच्छून्यास्तान् लात्यनुगृह्णातीति विठ्ठल इति व्युत्पत्त्या ज्ञानशून्यजनोद्धारकत्वेनान्वर्थाख्यं श्रीविठ्ठलेशं॥कारणानुरूपं हि कार्यमिति तत्कार्यकारिणस्तत्पुत्रपौत्रांश्च नुमः स्तुमः॥बाह्याभ्यंतरतमोनाशनसामर्थ्यबोधकमुभयसाधारणं विशेषणमाह ॥ श्रीमदिति॥ अर्थाद्वंशस्यपद्मरूपत्वात्तदुल्लासनसमर्थं तरणिं सूर्यमित्यर्थः ॥ यद्वा अर्थाद्वंशस्य स्वाधिष्ठानमंडलरूपत्वात्तदंतर्वर्तिनमित्यर्थः ॥ सूर्यरूपत्वमेव द्रढयति ॥ मायेति ॥ मायावादएव परममोहजनकत्वात्तमस्तस्य प्रपाटने समूलोन्मूलने पटुं समर्थं ॥ एतेन सकलसेवकजनमहामोहनिराकरणसमर्थत्वेनैतत्स्तवनस्य करिष्यमाणग्रंथविषये मोहनिवर्त्तकत्वं ध्वनितं॥एवं श्रीवल्लभविठ्ठलेशयोस्तरणितादात्म्यप्रतिपादनेन तद्वंश्यानामार्थिकं किरणरूपत्वं विशेषणेनाह ॥ तदिति ॥ तयोः सूर्यतादात्म्यापन्नयोर्वल्लभविठ्ठलेशयोर्घृष्ट्युच्चयः किरणसमूहस्तद्रूपान् ॥ तरणेस्तमोनाशकत्वं किरणद्वारैव भवतीति तेषामज्ञाननिवर्त्तनसमर्थत्वबोधकं विशेषणमाह ॥ निपुणानिति ॥ मानसेंऽतःकरणे ज्ञानरूपस्याब्जस्य कमलस्य प्रोल्लासने विकासने निपुणान् समर्थान् ॥ किरणरूपाणामेवंकरणस्य युक्तत्वद्योतको हि शब्दः ॥ मानसे सरसि हि अब्जविकासनं सूर्यकिरणैः प्रसिद्धतरम् ॥ जगदुद्धरणार्थं स्वेच्छयैव श्रीवल्लभादीनामिहावतरणमिति सूचयितुं सर्वसाधारणं विशेषणमाह ॥ नितांतेति ॥ कांतिः शोभेच्छयोः स्त्रियामिति मेदिनीकोशान्नितांतं अत्यंतं या कांतिरिच्छातया रुचिरान् ॥ भक्तजनोद्धरणदृढेच्छावतइत्यर्थः ॥ शार्दूलविक्रीडितं वृत्तं ॥ सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥ २ ॥

**श्रीपद्माक्षकटाक्षपातकिरणैर्देदीप्यमानान् स्वका
न् श्रीमद्वल्लभवंशदीप्तिवलये भास्वद्वरानादृताः॥रा
जद्गोकुलपूर्वशब्दसहितांस्तानुत्सवाख्यान् सदा त्व
ज्ञानांधनिवारणैकनिलयान् श्रीतातपादांस्तुमः ॥
॥ ३ ॥**

अथ स्वपितृवंदनमाचरति॥ श्रीपद्माक्षेति॥वयं आदृतौ सादरार्चितावित्यमरात् आदृताः सादराः संतः स्वकान् श्रीतातपादान् सदा स्तुमः ॥ स्तवनेनाभिलष्यमाणोद्देश्यसमर्थनसमर्थताबोधकं विशेषणमाह अज्ञानेति ॥ अज्ञानमेव अंधं तमस्यपीत्यमरादंधंतमस्तस्य निवारणविषये मुख्याश्रयभूतान् ॥ यतोह्येवंविधाः श्रीतातपादा अतोऽज्ञानतमोनाशनार्थं तेषां स्तवनमितिभावः॥ एतादृशहेतुहेतुमद्भावसूचको हिशब्दः ॥ तमोनिवारणयोग्यतासूचकं विशेषणद्वयमाह ॥ श्रीपद्माक्षेति ॥ श्रीमदितिच ॥ श्रीपद्माक्षस्य भगवतो ये कटाक्षपाताः सदयावलोकनानि तत्संबंधिभिः किरणैरतिशयेन प्रकाशमानान् ॥ तथा ॥ श्रीमद्वल्लभवंशएव दीप्तिवलयं तस्मिन्भास्वंतः सूर्यतादात्म्यापन्नास्तत्पुत्रपौत्रादयस्तेषां मध्ये वरान् श्रेष्ठान् ॥ विशेषणेन तन्नाम बोधयति॥ राजद्गोकुलेति ॥गोकुलोत्सवाख्यानित्यर्थः ॥ पूर्वोक्तंवृत्तं ॥ ३ ॥

**भवभयभरभरितं मद्धृदयं सदयायि तव कथांकु
रितं ॥ कुरु कुरु कुरुकुलरक्षक विघ्नद्रुमतक्षकप्रभो
त्वरितं ॥ ४ ॥**

प्रारिप्सितग्रंथे श्रीमन्नंदनंदनलीलानां वर्णनीयत्वेन तासां चानंत



त्वेन स्वस्य च परिच्छिन्नज्ञानत्वेन तल्लीलाविषयकस्फुरणं तन्निबंधने विघ्नविघातं च प्रार्थयते ॥ भवेति ॥अयि सदय प्रभो मद्धृदयं त्वरितं तव कथाभिरंकुरितं संजातांकुरं कुरु कुरु इन्वयः ॥ अनेन लीलास्फुरणं प्रार्थितं भवति ॥ कुरु कुरु इति द्विर्वचनेनात्यौत्सुक्यं बोधितं॥विघ्नविघातप्रार्थनाबोधकं विशेषणद्वयमाह ॥ कुरुकुलेति ॥ विघ्नेतिच ॥ अंतःकरणस्थैर्ये हि लीलास्फुरणं तदेवनास्तीति सूचयन् हृदयविशेषणमाह ॥ भवभयेति ॥ स्पष्टं ॥ गीतिरार्या वृत्तं ॥ आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥ दलयोः कृतयतिशोभां तां गीतिंगीतवान् भुजंगेश इति तल्लक्षणात् ॥ ४ ॥

**वाग्वृंदैः प्रपठंति केपि कवयः कीर्तिं परेषां परं शु
ष्कां तेन न तृप्तिमेति रसना प्राज्ञैर्विनिंद्येन वै ॥ त
स्माद्गोव्रजसुंदरीक्षणचकोरानंददं चंदिरं रम्यं त
द्विषयं करोमि विबुधाः श्रीकृष्णमत्यद्भुतं ॥ ५ ॥**

अथ तल्लीलानां पूर्वैर्बहुधा वर्णितत्वेन तद्वर्णितातिरिक्तवर्ण्यवस्तूनां बहूनां सत्वेन चायं प्रयासो विफल इत्याशंकां निवारयितुमितरकीर्तिवर्णनस्य रससारज्ञरसनातृप्त्यनाधायकत्वेन रसोवै स इति श्रुत्या वै इति निर्धारणवाचकपदप्रयोगेण श्रीमन्नंदनंदनातिरिक्तानां सर्वेषां रसरूपत्वाभावबोधनेनापरिच्छिन्ननिरतिशयरसरूपभगवद्वर्णनस्यैव रसनातृप्त्याधायकत्वेन तद्वर्णनं केवलं रसनातृप्तिद्वारा परमानंदावाप्त्यर्थमेव न ख्यात्याद्यर्थमिति विद्वदामंत्रणपूर्वकमाह ॥ वाग्वृंदैरिति ॥ अन्वयः सुगमः ॥ परेषां रसरूपभगवदति

रिक्तानां ॥ परं परंतु शुष्कां नीरसां पठंति ॥ एतेन रससारज्ञरसना
तृप्त्यनाधायकत्वं सूचितं ॥ तेन नीरसाया इतरकीर्तेः पठनेन ॥ चं
दिरोऽनेकपे चंद्रे इति मेदिनीकोशात् चंदिरं चंद्रं ॥ रम्यमिति विशे
षणेन निष्कलंकत्वं बोधितं ॥ व्रजसुंदरीत्यादिना प्रतीयमानमप्या
लंबनविभावत्वमुपलक्षणं बोध्यं ॥ विभावादीनां सर्वेषामपि भग
वदनतिरिक्तत्वात् ॥ तद्विषयं लीलावर्णनद्वारा रसनाविषयम् ॥ कृ
ष्णे चंद्रत्वारोपेण सुधामयत्वाद्रसरूपत्वाच्च ॥ कृष्णवर्णत्वेपि चंद्र
त्वमद्भुतत्वे बीजं ॥ शार्दूलविक्रीडितं वृत्तं ॥ ५ ॥

**ग०॥ अथ कदाचिद्धरा स्वपोषकवेषमिषोन्मिष
न्निरंतररोषकषायितपरुषपुरुषामिषादसंघविषा
दजोषंभावुकसाधुकुलकूलंकषे निजतले तद्भारा
सहिष्णुतयाऽऽत्माभिधानवाच्यत्वसंबंधेनेव गोवि
ग्रहंविधाय विविधचराचरविधायकत्वेन विधिवा
च्यतामनुभवंतं स्वीयपदसंख्याकानि वदनान्युद्वहं
तं तं देवमुपजगाम सास्रमुखी शनैः शनैराह चेद
म्॥ १ ॥**

अथ जन्मादिरहितस्यापिपरमात्मनोऽस्मिँल्लोके जन्मादिलीलाकर
णं प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्तत इति न्यायेन साभिसंधिक
मेव भवेदिति भूभारहरणद्वारा सकललोकोद्धरणरूपाभिसंधिं मन
सि निधाय भगवान् जन्मादिलीला अनुसृतवानिति वक्तुं भूमिर्दृ
प्तनृपव्याजेत्यादिना व्यसनं स्वमवोचतेत्यंतेन ग्रंथेन श्रीमद्भागवतो



क्तरीत्या बहुभाराक्रांताया भूमेर्गोरूपेण ब्रह्माणं प्रति शरणगमनं
प्रस्तौति॥ अथेत्यादिना गद्येन तदुत्तरश्लोकेनच॥ मंगलानंतरारंभप्र
श्नकार्त्स्न्येष्वथो अथेत्यमरादथशब्दआरंभे ॥ धरा पृथ्वी॥कदाचित्
स्वपोषकाणांराज्ञां वेषएव मिषं तेन कृत्वोन्मिषंतः प्रकटीभवंतो ये
निरंतररोषेण कषायिता व्याप्ता अत एव परुषाः क्रूराः पुरुषाः पु
रुषाः पूरुषा नरा इत्यमरान्नररूपा आमिषादा दैत्यास्तेषां संघसंबं
धी यो विषादो दुःखं तेन जोषंभावुकं तूष्णीमर्थे सुखे जोषमित्य
मरात्तूष्णींभवनशीलं यत्साधुकुलं तेन कूलंकषे लक्षणया परिपूर्णे
निजतले॥ अनेन साधुसंरक्षणमपि प्रार्थनीयमिति सूचितं॥ तेषाम
नुपदोक्तदैत्यानां भारस्यासहिष्णुतया असहनशीलत्वेन हेतुना ॥
गोविग्रहं गोस्वरूपं विधाय तं स्वकार्यकरणक्षमत्वेन बुद्धिस्थं देवं
ब्रह्माणं सास्रमुखी सती जगाम शनैः शनैरिदं वक्ष्यमाणमाह चे
त्यन्वयः ॥ गोरूपधारणे हेतुमुत्प्रेक्षते ॥ आत्मेत्यादिना ॥ आत्मनो
यदभिधानं गौरिला कुंभिनी क्षमेत्यमरात् गौरिति नाम तद्वाच्यत्व
रूपो यः संबंधस्तेनेव॥ कं देवमित्याकांक्षायामन्वर्थं तन्नाम विशे
षणद्वयेन बोधयति॥ विविधेत्यादिना स्वीयेत्यादिनाच॥ एवं च वि
दधाति चराचरमिति विधिरिति व्युत्पत्तिर्दर्शिता॥ स्वीयेत्यत्र स्वप
देन गौः ॥ एवं च चतुर्मुखमित्यर्थः ॥ १ ॥

**भो ब्रह्मन् भवदीयसृष्टिनिचयप्रोद्भूतदुष्टाशयक्ष्मा
धीशप्रकरप्रवेपितधियाऽहं त्वां शरण्यं प्रभुम्॥प्रा
प्ताऽस्मीति विचिंत्य स त्वमकृतद्रोहां वराहोद्धृतां म
त्वा श्रीपुरुषोत्तमं प्रकथय स्वात्मीयदुःखं द्रुतम्॥ ६॥**

यदुक्तवती तदाह ॥ भोइति ॥ भो ब्रह्मन् सः भगवत्तनूजत्वेनांतरंग तया तं प्रति भक्तदुःखनिवेदनाधिकारित्वेन प्रसिद्धस्त्वं श्रीपुरुषोत्तमं आत्मीयदुःखं आत्मीया मदादयस्तेषां दुःखं कंसादिजनितं व्यसनं द्रुतं प्रकथयस्वेत्यन्वयः ॥ अत्रोत्तरश्लोके च ब्रूञर्थत्वेन कथयतेर्द्विकर्मत्वं ॥ द्रुतमित्यनेनेतःपरं दुःखासहिष्णुत्वं प्रकथयस्वेत्यत्र प्रशब्देन कथने उपेक्षाराहित्यं च सूचितं ॥ किंकृत्वा ॥ अहं शरण्यं शरणे रक्षणे साधुं ॥ शरणं गृहरक्षित्रोर्वधरक्षणयोरपीतिमेदिनी ॥ प्रभुं त्वां प्राप्तास्मीति विचिंत्य ॥ तथा॥ मां अकृतद्रोहां वराहोद्धृतां च मत्वा निश्चित्य ॥ अनेन पूर्वं यथा निष्कारणोपद्रुतायाः समुद्रमग्नाया मम उद्धरणं त्वत्प्रार्थनया कृपानिधिना भगवता वराहरूपेण कृतमेवमिदानीमपि भाराक्रांताया ममोद्धरणमवश्यं करिष्यतीति निःशंकं भगवदग्रे त्वया पूर्ववृत्तस्मारणपूर्वकं कथनीयमिति सूचितं॥ आगमनपूर्वकं श्रीमद्भगवत्प्रार्थनत्वराकरणे हेतुमाह॥ भवदीयेत्यादि॥ भवदीयो भवत्कर्तृकोयः सृष्टिनिचयस्तस्मिन्प्रोद्भूताउत्पन्नाये दुष्टाशयादुष्टांतःकरणाः क्ष्माधीशाराजानस्तेषां प्रकरेण समूहेन प्रवेपिताप्रकंपिता अनवस्थितेतियावत् एवंविधाया धीर्बुद्धिस्तयाहेतुना ॥ शार्दूलविक्रीडितंवृत्तं ॥ ६ ॥

**तच्छ्रुत्वा विधिरप्यती वदयया साकं तया तत्क्षणं**
**क्षीराब्धेस्सुतटं सदा विटपिभिः सांद्रं महेंद्रादिभिः॥**
**नागेंद्रोत्पृथुवर्ष्मकांतिविलसच्छुभ्रस्य देवैर्मुदा स्तु**
**त्वा श्रीपुरुषोत्तमं स्वकथयत्प्राप्यातिदुःखं समम् ॥**
**॥ ७॥**





अथ॥ ब्रह्मातदुपधार्याथेत्याद्युक्तं प्रस्तौति॥ तदिति॥ विधिरपिब्रह्मापि तत्पृथ्व्युक्तं श्रुत्वा अतीव अतिशयितया॥ स्वत्यतीवचनिर्भरइत्यमरः॥ दययातत्क्षणं तयापृथ्व्या तथा महेंद्रादिभिर्देवैः साकंसह नागेंद्रस्य शेषस्य उत्पृथु अतिमहद्यद्वर्ष्म वर्ष्मदेहप्रमाणयोस्त्यिमराद्देहस्तस्य याकांतिर्द्युतिस्तयाविलसन् द्वैगुण्यरूपविशेषेणशोभमानः शुभ्रः शुक्लवर्णोयस्यैवंभूतस्य क्षीराब्धेर्विटपिभिर्वृक्षैः सदा सांद्रं निबिडं सुंदरं तटंतीरं प्राप्य मुदा परमानंदेनोपलक्षितं समंसर्वत्रसमदृष्टिं मया लक्ष्म्या सहितंवा श्रीपुरुषोत्तमं स्तुत्वा अतिदुःखं स्वकथयत्॥ सदा विटपिभिः सांद्रमित्यनेन तत्रत्यवृक्षाणां वसंताद्यृतुकालानपेक्षं रमणीयत्वं बोधितं ॥ सुशब्देनोत्तरभाविनि प्रसादे विलंबाभावःसूचितः ॥ शार्दूलविक्रीडितंवृत्तं ॥ ७॥

**दैन्यं निधाय निखिलं हृदि नाकिवर्ग्यं सैन्यं निहंतु**
**मसुरस्य स एवमूचे॥ भक्तारिकंठविषये किल भक्त**
**दृष्टौ दातुं निजास्त्रममलं च तदीयसंज्ञाम् ॥ ८ ॥**

अथ विधिप्रार्थनानंतरं श्रीभगवान् भूसहिताखिलदेववर्गसंबंधि दुःखं हृदि कृत्वा सर्वासुरसैन्यहननोद्देशेन तं प्रत्युक्तवानित्याह॥ दैन्यमिति॥ नाकिनांदेवानां वर्गेभवं नाकिवर्ग्यं दैन्यं॥ वर्गांताच्चेत्यनुवर्त्तमाने अशब्देयत्खावन्यतरस्यामित्यनेन यत्प्रत्ययः॥ एवं वक्ष्यमाणप्रकारेण॥ पूर्वार्धान्वयःस्फुटः॥ किलेतिवाक्यालंकारे॥ उक्तावुद्देश्यांतरमाह भक्तेत्यादि॥ भक्तारिकंठविषये अमलंतेजस्तत्वं सुदर्शनमिति॥ श्रीभागवतोक्तेस्तेजस्तत्वरूपं निजास्त्रं दातुं तत्कंठच्छेदं कर्तुमित्यर्थः तथाभक्तदृष्टौ तदीयसंज्ञां सुष्ठुदर्शनमित्यर्थवती सुदर्शनरूपांच दातुमिति

योजना॥कारकाणां विवक्षाधीनत्वाद्धिकरणत्वविवक्षयासप्तमी॥ वसंततिलकावृत्तं॥उक्ता वसंततिलका तभजाजगौ ग इति तल्लक्षणात्॥ ८ ॥

**यूयं सुदर्शनाः शश्वत्तथापि मदनुज्ञया॥ कुदर्शना द्राग् भवत विपक्षक्षपणाय तत्॥ ९ ॥**

यदूचेतदाह॥यूयमिति॥यतोभवद्भिः प्रार्थितं तत्तस्माद्धेतोः यद्यपि यूयं शश्वन्निरं तरंसुदर्शनाःसुष्ठुदर्शनमवलोकनंज्ञानंवा येषांते सुदर्शनादिव्यरूपाः दिव्यज्ञानवंतोवास्थ तथापि मदनुज्ञया ममाज्ञावशतः द्राक् शीघ्रं विपक्षक्षपणाय शत्रुनाशनाय कुत्सितं दर्शनमवलोकनं ज्ञानंवा येषांते कुदर्शनाः कुरूपाः कुत्सितज्ञानवंतइत्यर्थ इतिविरोधः॥परिहारस्तु कौ पृथिव्यां यादवगोपालादिरूपेण दर्शनं प्रादुर्भावो येषांतइति॥तादृशाभवत॥अथवा॥तत्कुदर्शनभवनं यतो विपक्षक्षपणाय शत्रुक्षयं कर्तुं॥ अतोयुक्तं तथाभवनमितिभावः॥ ९ ॥

**ग० ॥ तदनुज्ञया ते तथैवाकुर्वन्॥ अथ तत्रभवद्धीमत्सवितृतनुजावारिवर्तितरलतरतरंगातितरलिततत्रत्यवनजातजातजातमधुपवरवृंदसुपेयामंदमरंदसौरभभरभरितामोदकरणचणनवपर्णगुणगणश्रीशरणतरुततिकुसुमसुगंधबंधुरसरलसमीरणचंचलितचित्रतमध्वजपताकांचलचोरिततपनातपतापं महानर्घ्यश्लाघ्यरत्नसंघसंघटितविविधवैजयंतैः कृतवैजयंततातपदोपहासं प्रति**



**गृहं स्वीयसंततिसमृद्धिप्रवृद्धिसुखमनुभवितुं समागतैः सपरिग्रहकलानिधिभिरिव सुवदनैर्विलसंतीभिः सुललनाललामललितमुक्तामणिभूषणविभूषिताभिर्वधूटीभिर्विराजमानं वीणामृगंप्रदभ्रतिश्रवणास्वाद्यवाद्यकलितकुशलकुशीलवकृतसंगीतरीतिगीतिप्रीतिविवशीभूतरसिकमानसं बहुविधामरद्रुमप्रसूनप्रकरप्रसृतपरिमलविहंगममंजुकूजितनिवासिजनसुखदसदनोद्यानत्वद्यं परमसुभगपौरप्रचरणपरिचयोपचीयमाननयनानंदवीथिसहस्रं नव्यपदार्थोपलब्धिपण्यश्रेणिशोभमाधोरणनियमितप्रचलत्कर्णतालविशालशुंडादंडमंडितचंडशुंडालाखंडलमंडलगंडस्थलदानपंकपंकिलराजपथं तद्बृंहितघंटाघणत्कारसहकारशातकुंभोपस्करोपस्कृतशतांगशतनेमिघोषविचित्रगतिसतिसमूहहेषितघोषितपदातिकुलसंकुलघंटापथमिष्टानिष्टवर्धकस्वधर्मरतैश्चतुर्भिर्वर्णैर्निबिडितंसुवर्णस्वर्णदुर्वर्णताम्रनिर्मितदुर्गमदृढदुर्गनिर्गताराविभयं सद्दुर्गत्वसूचितस्वनिष्ठाशिवत्वं दिदृक्षागतसहस्राक्षप्रमुखानिमिषव्रातनेत्रार्विबैरिव बहललोलल्लोलंबतरलाविरलकमलैःकलितया निर्मलसलि**

**लपरिखयाऽतिशयितमनोज्ञं मुनिशतमखव्रजा
चरितवासमपि मुनिशतमखव्रजस्थं मुमुक्षुवरे
ण्यं समग्रतीर्थचक्राग्रगण्यं मथुरानामधेयं पुरमु
ल्लसति॥ २॥**

तदन्विति॥तदनु भगवदुक्त्यनंतरं तदनुज्ञया तस्य ब्रह्मणोऽनुज्ञया ते
देवाः तथैव अकुर्वन्॥ सस्त्रीकाः स्वावतारादिकं चक्रुः॥तदुक्तं श्री
मद्भागवते ॥ गिरं समाधौ गगने समीरितामित्यादिना॥अथ श्रीमद्भ
गवज्जन्मलीलां वर्णयितुं तदुपोद्घाततया मथुरायां देवकीवसुदवयो
र्विवाहोत्सवं तत्प्रसंगेन कंसं प्रत्याकाशवाणीभवनादिवृत्तंच प्रस्तोष्य
न्नादौ मथुरां वर्णयति ॥ अथेत्यादिना गद्येन॥अथेत्यारंभे मंगलेवा
मथुरानामधेयं पुरं उल्लसति परमोत्कर्षेण शोभते ॥ अथ श्रीमद्यमु
नातीरवर्तित्वं तत्संबंधिदिव्यनीरजजनितमधुसौरभपरिपूर्णपवनसं
चरणेन परमपाविञ्यं परमसुखदत्वं च बोधयति ॥ तत्रभवदित्यादि
नातापमित्यंतेन विशेषणेन ॥ तत्रभवती परमपूज्या श्रीमती या स
वितृतनुजा यमुना तत्संबंधि यदुदकं तद्वर्तिनोये तरलतरतरंगास्तैर
तितरलितं यत्तत्रत्यवनजातानां यमुनोद्भवकमलानां जातं व्यक्तौ
घजन्मस्विति मेदिनीकोशाज्जातं समूहस्तस्माज्जातौ यौ मधुपवराणां
भृंगश्रेष्ठानां वृंदेन सुष्ठुपेयः अमंदोऽनल्पो मकरंदश्च सौरभभरः सुगं
धातिशयश्चेति तौ ताभ्यां भरितःपरिपूर्णः अतएव आमोदः आमो
दः सोतिनिर्हारीत्यमरात् अत्यंताकर्षी सुगंधस्तस्य करणेन वित्तः प्र
ख्यातआमोदकरणचणः सच॥तेनवित्तइतिचणप्॥नवानि पर्णानिगु
णगणाश्च तेषां या श्रीस्तस्याः शरणान्याश्रयभूता ये तरवस्तेषां या



ततिस्तत्संबंधिकुसुमगंधेन बंधुरं मुकुटे पुंसीत्युपक्रम्य त्रिषुस्याद्रम्य
नम्रयोरितिमेदिनीकोशोक्तेर्बंधुरोरम्यः सरलोऽप्रतिबंधश्च यः समी
रणोवायुस्तेन चंचलिताश्चांचल्यं प्रापिताश्चित्रतमाः ध्वजानां म
हतां केतूनां पताकानामल्पानां तेषां च ये अंचलास्तैश्चोरितोऽतर्धा
पितस्तपनातपस्य सूर्यातपस्य तापोयस्मिंस्तत् ॥ नानाविधामूल्यर
त्नघटितप्रासादनिबिडितत्वेनामितसंपन्निधित्वात्स्वर्गाधिकैश्वर्यनि
धित्वबोधकं विशेषणमाह॥महानर्घ्येति॥महता अमूल्यस्तुत्यरत्नसंघे
न सस्यक् घटिता ये वैजयंताः वैजयंतोगृहेशक्रध्वजप्रासादयोः
पुमानिति मेदिनीकोशात् गृहाणि तैः कृत्वा वै निश्चयेन कृतः ज
यंततातस्येंद्रस्य पदं स्वर्गस्तस्य उपहासोयेनैवंविधं॥अस्यानेकवैज
यंतत्वेनैकवैजयंतस्वर्गापेक्षयाऽऽधिक्यं स्फुटमेव॥परमरमणीयस्ववनि
ताधिकसौंदर्यवत्सीमंतिनीसंयुक्तत्वेनाप्यस्य स्वर्गाधिक्यं बोधयति
प्रतीत्यादिना विराजमानमित्यंतेन॥सुवदनैर्विलसंतीभिः शोभमाना
भिः सुललनासुस्ववनितादिषु ललामानि ललामंपुच्छपुंड्राश्वभूषा
प्राधान्यकेतुष्वित्यमरात् भूषणभूताः अथवा तासु ललामं प्राधान्यं
यासामेवं भूताश्चता ललितमुक्तामणिभूषणविभूषिताश्च ताभिः वधू
टीभिः बाला स्त्री स्याद्वधूटिकेतिकोशाद्बालाभिः॥एतेन तासां जरा
द्यभावः सूचितः॥ताभिर्विराजमानं॥स्त्रीणां मुक्ताद्यलंकारविभूषित
त्वेन तद्वदनानामपि तथात्वात्तद्विषयेउत्प्रेक्षते॥आगतैः सपरिग्रह
कलानिधिभिरिव सनक्षत्रशशिभिरिव॥आगमनप्रयोजनं संभावय
ति॥प्रतिगृहं स्वीयानां स्ववंशोद्भवानां यादवानां या संततिस्तस्याः
समृद्धिप्रवृद्धिरैश्वर्यवृद्धिस्तत्सुखमनुभवितुं ॥ श्रवणास्वाद्यवाद्यवा
दनगीतादिगुणवत्कुशीलवयुक्तत्वेनापि नेतः स्वर्गोधिकइत्याशयग

र्थं विशेषणांतरमाह॥वीणामृदंगेत्यादिना मानसमित्यंतेन॥स्पष्टं॥सं
गीतशास्त्रोक्तलक्षणविरुद्धगीतिव्यावृत्त्यर्थंगीतौ संगीतरीतिवैशिष्ट्यं
सुरतरुविराजमाननंदनवनवत्तयापि नाधिक्यं स्वर्गस्येत्याशयेन वि
शेषणांतरमाह॥बहुविधेत्यादिना हृद्यमित्यंतेन॥ अनेकविधामरद्रुम
पुष्पसमूहात् प्रसृतपरिमलानि विहंगमानां मंजु कूजितं येषु तानि
च निवासिजनसुखदानि च यानि सदनोद्यानानि तैर्हृद्यं॥एवं चस्वर्गे
एकमेवनंदनवनं तत्रच पंचैवसुरतरवः अत्र तु तान्यनेकानि तेषुचानं
ताः सुरतरवइत्याधिक्यं स्फुटं॥व्यवहारधुरीणानेकविधधनिकविशि
ष्टत्वमनेकविधापूर्वपदार्थविशिष्टत्वंच बोधयितुं विशेषणद्वयमाह
परमेत्यादि ॥ परमसुंदरपौरसंचाराभ्यासेन कृत्वा उपचीयमानोवर्द्ध
मानोनयनानंदोयस्मिन्नेवंविधं वीथीसहस्रं मार्गसहस्रं यस्मिन्नेवं
विधं॥तथा॥नव्येति ॥नव्यपदार्थानामुपलब्धिः प्राप्तिर्यस्यामेवंविध
या पण्यश्रेण्या शोभा यस्मिंस्तत्॥एतेन सुतरां स्वर्गाधिक्यं॥तत्रतस्या
अभावात् ॥ चतुरंगसैन्यसंपद्विशिष्टत्वबोधकं विशेषणद्वयमाह॥आ
धोरणेत्यादि॥गजशिक्षकनियमितं प्रचलत्कर्णतालं विशालशुंडादं
डमंडितं चंडं यत्शुंडालाखंडलानां गजेंद्राणां मंडलं समूहस्तस्य गं
डस्थलसंबंधिना दानेन मदोदकेन पंकिला राजपथा यस्मिंस्तत्॥आ
धोरणाहस्तिपकाइत्यमरः॥तथा॥तदिति॥तच्छब्देन गजाः परामृश्यं
ते॥गजबृंहितघंटाघणत्कारयोः सहकारः साहित्यं यस्यैवंविधोयः
स्वर्णोपस्कारालंकृतरथचक्रधाराघोषः सच विचित्रगत्यश्वसमूहश
ब्दितंच घोषः संजातोयस्यैवंविधं यत्पदातिकुलं च एतैः संकुला
व्याप्ता घंटापथा राजमार्गायस्मिंस्तत्॥स्वस्वधर्मानुवर्तिवर्णचतुष्टय
वत्तां बोधयति॥इष्टेत्यादिना॥इष्टानिष्टयोर्वर्द्धकायथाक्रमं वृद्धिक



र्त्तारश्छेदकाश्च ते च ते स्वधर्मनिरताश्च तैस्तथाविधैरित्यादि स्फु
टं ॥ यद्वा इष्टानिष्टवर्द्धकोयः स्वधर्मस्तत्र रतैरिति ॥ दुर्गसंपत्तिहे
तुकमरातिदुष्प्रवेशत्वं बोधयति ॥ सुवर्णेत्यादिना ॥ सुवर्णं उत्तमव
र्णं ॥ एतत्स्वर्णादित्रितयविशेषणं ॥ तेनतेषांनैर्मल्यंबोध्यते ॥ एवं
विधं स्वर्णं दुर्वर्णं रजतं रूप्यमित्यमरात् दुर्वर्णं रजतं ताम्रं च द्वंद्वे ए
तैर्निर्मितं दुर्गमं दृढं यद्दुर्गमित्यादि स्फुटं ॥ अतएव सर्वदा परममं
गलरूपत्वं बोधयति ॥ सदुर्गत्वेति ॥ दुर्गसहितत्वेन सूचितं स्वनिष्ठं
शिवत्वं निरूपद्रवत्वं येनैवंविधं ॥ दुर्गया पार्वत्या सहित इति व्यु
त्पत्त्या पार्वतीसहिते शिवत्वं प्रसिद्धं ॥ पार्वतीसहिते यथा शिव
त्वाव्यभिचारस्तथाऽस्मिन्नपि सदुर्गत्वात् शिवत्वस्याव्यभिचारः ॥
एवंच मुक्तिदातृत्वेन सर्वदा मंगलरूपमित्यर्थः॥ परिखाविशिष्टत्वे
नाप्यरिपरिभवराहित्यं बोधयति ॥ दिदृक्षेत्यादिनामनोज्ञमित्यंतेन॥
बहला लोलंतो ये रलयोः सावर्ण्याल्लोलंबाः भ्रमरश्चंचरीकः स्या
द्रोलंबो मधुसूदन इति त्रिकांडशेषाद्भ्रमरास्तैः कृत्वा तरलानि चं
चलानि अविरलानि निबिडानि यानि कमलानि तैः कलितया
युक्तयेत्यादि स्फुटं ॥ सलिलस्य निर्मलेति विशेषणेन प्रतिबिंबभ
वनयोग्यत्वं बोधितं ॥ इमानि भ्रमरविशिष्टानि कमलानि न भवं
ति किंतु तरलतरगोलकविशिष्टानां दर्शनेच्छागतेंद्रप्रमुखदेवगणन
यनानां प्रतिबिंबान्येवेत्युत्प्रेक्षते ॥ दिदृक्षेति ॥ दिदृक्षया एतत्पुरा
वलोकनेच्छया आगतो यः सहस्राक्षप्रमुखानामिंद्रादीनामनिमि
षाणां देवानां व्रातः समूहस्तस्य नेत्राणां बिंबैः प्रतिबिंबैरिव ॥ सुर
मत्स्यावनिमिषौ ॥ स्तोमौघनिकरव्रातवारसंघातसंचया इति चाम
रः ॥ बिंबं तु प्रतिबिंबेऽपीति मेदिनी॥अस्य निवासमात्रेण मुक्तिदा

तृत्वमतएव मुमुक्षुमुनिसंघाधिष्ठितत्वमतएव समयतीर्थाग्रगण्यत्वं चेति शेषविशेषणैर्बोधयति ॥ मुनीत्यादिनाऽग्रगण्यमित्यंतेन ॥ मुनिशतमखा मुनींद्रास्तेषां यो व्रजः समूहस्तेन कृतो वासो वसतिर्यस्मिन्नेवंविधमपि मुनींद्रव्रजे तिष्ठतीत्येवं विधमिति एकस्यैव व्रजस्याधेयत्वाधारत्वयोः प्रसक्त्या विरोधाभासः ॥ परिहारस्तु मुनीनां शतमनंताः मखाः क्रतवो यस्मिन्नेवंविधो यो व्रजश्चतुरशीतियोजनात्मको देशस्तस्मिंस्तिष्ठतीत्येवंविधमिति ॥ मुमुक्षुवरेण्यमित्यनेन नित्यं भगवत्सान्निध्यं बोधितं ॥ तदुक्तं॥ मथुरा भगवान्यत्र नित्यं सन्निहितोहरिरिति॥ वरेण्यमित्यत्र वृञ एण्यप्रत्यय औणादिकः ॥ तेन वरणीयमित्यर्थः ॥ इतरत्सुगमं ॥ २ ॥

**इत्थंभूतमेतत् ॥ दाशार्हवृष्ण्यंधकभोजवीरनाथः कुनाथत्वमथ प्रकाश्य ॥ शशास चंडैर्दनुजांशभूतैरन्वर्थनामा किल कंससंज्ञः ॥ १० ॥**

इत्थंभूतमेतदिति ॥ अस्योत्तरश्लोकेन संबंधः ॥ अथ दाशार्हादिवीरनाथो हिंसकत्वेनान्वर्थनामा कंसः स्वस्य पृथ्वीनाथत्वकुत्सितनाथत्वे प्रकाश्य क्रूरैर्दनुजांशभूतैः सहायैः पूर्वोक्तप्रकारमेतत् मथुरानामधेयं पुरं पालयति स्मेत्याह ॥ दाशार्हेत्यादि ॥ दशार्हादिवीराणां यादवभेदानां वीराणां नाथः पालकः उपतापकश्च ॥ नाथृ नाधृयाञ्चोपतापैश्वर्याशीःष्विति धातुसूत्रात् ॥ कोः पृथ्व्या नाथस्तस्य भावस्तत्त्वं कुत्सितनाथत्वं च ॥ कंस्ते हिनस्ति लोकानिति कंसः ॥ किलेत्यैतिह्ये॥इतरत्सुगमं॥ उपजातिर्वृत्तं ॥ अनंतरोदीरित





लक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति तल्लक्षणात् ॥ १० ॥

**ग० ॥ तस्य खलु खलस्यास्यनवद्यहृद्या गुणसंपत्संपद्यमानशोभातिरेकहृद्या देवकी शुभनामधेया स्वसा ॥ ३ ॥**

तस्येति॥खलु स्याद्वाक्यभूषायामितिमेदिनीकोशात् वाक्यालंकारे खलुशब्दः॥तस्य कंसस्य शुभनामधेया श्रीभगवदुत्पत्तिनिदानत्वेन शुभं कल्याणरूपं नामधेयं यस्याः सा देवकी स्वसा भगिनी अस्ति ॥ कीदृशी या अनवद्यहृत् अनवद्यं निर्दोषं हृत् हृदयं यस्याः सा ॥ यद्वा ॥ अनवद्यानां निर्दोषाणां योगिनां श्रीभगवत्प्रादुर्भावनिदानत्वेन हृद्या हृदयस्य प्रियेति एकं पदं ॥ तथा या च गुणसंपदिति ॥ सुगमं ॥ ३ ॥

**तस्मिंस्तदा तस्यतनूनपातस्तस्याः स्वसुः सद्वसुदेवसंज्ञः॥ साक्ष्ये करग्राहमसौ चकार प्राज्ञः प्रहृष्यन्प्रणयप्रपूरः ॥ ११ ॥**

अथ मथुरायां वसुदेवोऽग्निसाक्षिकं देवक्याः पाणिग्रहणमकरोदित्याह ॥ तस्मिन्निति ॥ प्राज्ञः प्रणयप्रपूरः सद्वसुदेवसंज्ञोऽसौ तस्मिंस्तनूनपातः साक्ष्ये सति तस्य तस्याः स्वसुः करग्राहं तदा प्रहृष्यन्संश्चकारेत्यन्वयः ॥ प्रणयं स्नेहं प्रकर्षेण पूरयतीति प्रणयप्रपूरः ॥ सती अन्वर्थत्वेन उत्तमा वसुदेवइति संज्ञा यस्यैवंभूतः ॥ वसुना द्रोणाख्यवस्ववतारभूतेन नंदेन दीव्यति मित्रत्वेन व्यहरति मोदते क्रीडति वा वसुदेव इत्यन्वर्थसंज्ञ इत्यर्थः ॥ नंदस्य द्रोणावतारत्वं द्रोणो वसूनां प्रवर इत्यादिना श्रीमद्भागवते उक्तं ॥ तस्मिन्पुरे ॥ तनू

नपातः जातवेदास्तनूनपादित्यग्निपर्यायेष्वमरात् अग्नेः॥ तस्य कंसस्य ॥ तस्याः पूर्वोक्तगुणविशिष्टायाः स्वसुर्भगिन्या देवक्याः करग्राहं पाणिग्रहणं ॥ तच्छब्दस्य बुद्धिस्थपरामर्शकत्वेन तदा कलिद्वापारयोः संधिवेलायां ॥ प्राज्ञः प्रहृष्यन् प्रणयप्रपूर इत्यनेन प्रवृत्तिनिवृत्त्युभयमार्गनैपुण्यं तस्य ध्वन्यते॥इंद्रवज्रा वृत्तं॥ स्यादिंद्रवज्रा यदि तौ जगौ ग इति तल्लक्षणात् ॥ ११ ॥

**कृतोद्वाहे तस्मिन्सुमतिवसुदेवे क्षितिपतिः सुताप्रीत्यै प्रादाद्बहुवररथाश्वद्विपभटं॥धनं तस्मै दासीशतमपि महानर्घ्यमणिभिः सुवस्त्रालंकारप्रकरमतिहृष्टः शुभमतिः॥ १२॥**

अथ विवाहानंतरं देवको देवकीपिता हृष्टः सन् वसुदेवाय सुताप्रीत्युद्देशेन चतुरंगसैन्यं धनं तथा दासीशतं तथा अमूल्यरत्नसहितवस्त्रालंकारांश्च प्रादादित्याह ॥ कृतोद्वाहइति ॥ क्षितिपतिः सुतापदसमभिव्याहाराद्देवकः ॥ अतएव श्रीमद्भागवते उक्तं ॥ दुहित्रे देवकः प्रादादिति ॥ भटमित्यत्र सेनांगत्वादेकवद्भावः ॥ शिखरिणी वृत्तं ॥ रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणीति तल्लक्षणात् ॥ ॥ १२ ॥

**तदनंतरम्॥ गंधर्वयुग्मद्वययुक्त उत्तमे रथे समारोप्य सुखं सुदंपती॥स्वसुर्हि तुष्ट्यै स्वयमास्थितः खलो रश्मींश्च जग्राह तदा स सौख्यतः॥ १३॥**

तदनंतरमिति ॥ अस्योत्तरश्लोकेनान्वयः ॥ अथ विवाहानंतरं तदा गृहप्रवेशवेलायां खलः कंसश्चतुरश्वयुक्ते रथे दंपती सुखं यथा



स्यात्तथा समारोप्य स्वस्वसृतुष्ट्यर्थं परमसंतोषेण स्वयमपि यंतृस्थाने स्थितः सन् रश्मीन् जग्राहेत्याह॥गंधर्वेत्यादि॥वाजिवाहार्वगंधर्वेत्यमरात् गंधर्वा अश्वास्तेषांयुग्मद्वयं चतुष्टयं तेन युक्ते॥सुदंपतीइत्यत्र भगवदुत्पत्तिनिदानत्वेन शोभनत्वसूचकः सुशब्दः॥रश्मीनुप्रग्रहान् ॥ पूर्वार्धोपात्तं सुखं दंपतिनिष्ठमिति सौख्यतइत्यनेन नपुनरुक्तिः ॥ अन्यत्सुगमं ॥ इंद्रवंशावंशस्थयोरुपजातिः ॥१३॥

**ग०॥ तदनु तदा सुरभिस्यंदनशतक्षरन्मदसुगंधबंधुरसिंधुरधुरंधरसमूहसैंधवसंदोहपदातिप्रकरचरणप्रचरणक्षुण्णक्षोणीतलोत्पत्तितधूलिकणधोरण्येव धरण्या निजवलयेपि अन्वर्थीकरिष्यमाणनाम्नो हरेर्जन्मनिदानदंपत्यवलोकनोत्सुकया तया धूसरिते श्रोत्रसुखदविविधमंगलवाद्यनिस्वनैर्धमानात्मगुणैर्वरदेशे निजसाम्यं विधातुं तस्मिन्न शरीरिणी वाणीत्थमाविरासीत्॥ ४॥**

तदन्विति ॥ तदनु रश्मिग्रहणानंतरं ॥ तदा गमनावसरे ॥ सुरभिसुरभिरित्युपक्रम्य सुगंधिकांतयोस्त्रिष्विति मेदिनीकोशोक्तेः कांतं यद्रथशतं॥तथा क्षरन्मदसुगंधरम्याये सिंधुरधुरंधराः हस्ती महामृगः पीलुः सिंधुरोदीर्घमारुतइति त्रिकांडशेषात् गजश्रेष्ठास्तेषां समूहः॥ तथा सैंधवसंदोहः हयसैंधवसप्तयः संदोहविसरव्रजाइति चामरात् अश्वसंघः ॥ तथा पदातीनांप्रकरः प्रकरः स्यात् पुमान् संघे इति मेदिनी कोशात् समूहः ॥ चतुर्णां द्वंद्वे तेषां चरणप्रचरणेन क्षुण्णं विदीर्णं यत्क्षोणीतलं तस्मादुत्पत्तितया धुलिकणानां धोरण्या

परंपरया धूसरिते मलिनीकृते इति अंबरदेशविशेषणं ॥ नेयं धुलि धोरणी किंतु स्वभारहरणकर्तृत्वेनान्वर्थहरिनामश्रीभगवत्प्रादुर्भाव कारणदंपत्योः स्वपृष्ठस्थितयोरवलोकनासंभवात् तदभिलाषेणोर्ध्व प्रदेशे संप्राप्ता भूमिरेवेयं किमित्युत्प्रेक्षते ॥ धरण्येति ॥ इवशब्दो भिन्नक्रमः ॥ निजवलयेऽपि ॥ अत्र निजशब्देन पृथ्वीसंबंधि ॥ भूभारहरणद्वारा अग्रे अन्वर्थीकरिष्यमाणमनुगतार्थीकरिष्यमाणं हरिरिति नाम येनैवंविधस्य हरेर्जन्मनिदाने जन्मकारणभूतौ यौ दंपती वसुदेवदेवकीरूपौ तयोरवलोकनविषये उत्सुकया तया प्रसिद्धयाधरण्येव पृथ्व्येव॥तथा श्रोत्रसुखदविविधमंगलवाद्यनिःस्वनैरेधमानो वर्धमान आत्मनः स्वस्य गुणः शब्दो यस्मिन्नेवंविधेंऽबरदेशे आकाशदेशे अशरीरिणी शरीररहितावाणीइत्थं वक्ष्यमाणप्रकारा आविरासीत् ॥ किमर्थमत आह ॥ तस्मिन्कंसे निजसाम्यं विधातुं ॥ यथा स्वयं शरीरहीना तथा एतमपि शरीरहीनं कर्तुं ॥ देवकीहननादिरूपापराधकरणे प्रवर्तनेन कुपितभगवद्द्वारामारयितुमित्यर्थः ॥ ४ ॥

**कंसाष्टमगर्भोऽस्या दर्भमिवाग्निर्द्रुतं हि भो त्वांतु॥**
**नाशयितेत्युक्ता सा समाप्ति मगमच्छरीररहिता**
**वाक्॥ १४॥**

अशरीरिणी वाक्केन रूपेणाभूत्तदाह ॥कंसेति ॥ भो हे कंस अस्या देवक्याः ॥ अन्वयः स्फुटः ॥ तु स्याद्भेदेऽवधारणे हि हेताववधारणे इति चामरादवधारणवाचकौ तुहिशब्दौ तयोरेकस्याष्टमगर्भइत्यनेनापरस्य नाशयितेत्यनेन संबंधः॥तेनाष्टमगर्भातिरिक्तस्य हंतुर



भावस्तथा नाशयितैवेत्यनेनन केनापि त्वदुपायेन तन्नाशसंभावनापीति सूचितं ॥ दर्भमिवाग्निरित्युपमया च त्वन्नाशकरणे तस्यायासाभावः सूचितः ॥ गीतिरार्या वृत्तं ॥ १४ ॥

**ततस्तच्छ्रुत्वोच्छ्रितबाहुबलावलेपबहलोच्छृंखलः**
**खलः खलु खलीननिर्मुक्तक्रोधांधांतःकरणवशग**
**श्चंडो मंडलाग्रेण करेण कचे गृहीत्वा सुभगां भगि**
**नीं संभ्रमाद्धंतुमारभत॥ ५॥**

एवमशरीरवागभिप्रायमबुध्वा स्वमृत्युनिवारणार्थं भगिन्या एव हननं कर्तुमारब्धवानित्याह ॥ ततइतिगद्येन ॥ खल्विति वाक्यालंकारे ॥ ततस्तदाकाशवागुक्तं श्रुत्वा चंडोऽत्यंतकोपनः खलः कंसः सुभागामलौकिकैश्वर्यसंपन्नामपि भगिनीं देवकीं करेण कचे गृहीत्वा संभ्रमस्त्वरेत्यमरात् संभ्रमात्त्वरया मंडलाग्रेण खड्गे तु निस्त्रिंशचंद्रहासासिरिष्टयः॥ कौक्षेयको मंडलाग्रकरवालकृपाणवदित्यमरात् खड्गेन हंतुमारभतेत्यन्वयः॥कीदृशः॥उच्छ्रितेति ॥ उच्छ्रितं त्रिषुसंजाते समुन्नद्धप्रवृद्धयोरिति मेदिनीकोशात् उच्छ्रितः प्रवृद्धो यो बाहुबलावलेपो बाहो भुजे पुमान्मानभेदाश्ववृषवायुष्विति मेदिन्याः भुजबलगर्वस्तेन बहलमत्यंतमुच्छृंखलः॥ तथा॥खलीनेति ॥ कविका तु खलीनोऽस्त्रीत्यमरात् खलीनमश्ववशीकरणार्थं मुखबंधनं भाषायां लगाम इति प्रसिद्धं तेन निर्मुक्तं लक्षणया अनावरकं यत्क्रोधांधांतःकरणं ॥ खलीननिर्मुक्त इति क्रोधविशेषणं वा ॥ तद्वशगस्तदधीनः ॥ यथा मुक्तखलीनोऽश्वः कस्यापि वशे न तिष्ठति प्रत्युतारूढमपि स्ववशं करोति तद्वत् क्रोधपराधीनां

तःकरण इत्यर्थः ॥ एतेन तां दैवीमपि परमार्थभूतामपि वाचम नादृत्य भगिन्या अपि हननोद्यमो युज्यतएवा स्येति सूचितं॥५॥

**तं तादृशं समवलोक्य दयाविहीनं शौरिः सुधीः सविनयो ऽधममित्थमूचे॥ दास्ये प्रजाः स्वभगिनीं कृपणां विमुंच सिंचायि सौख्यसुधया स्वजनान् हि कंस॥ १५॥**

अथ वसुदेवो मृत्युर्बुद्धिमताऽपोह्यो यावद्बुद्धिबलोदयमित्यादिश्रीमद्भागवतोक्तरीत्या मनसि विचार्य देवकीहननात्कंसं निवर्त्तयितुं स्वापत्यदानं प्रतिज्ञातवानित्याह ॥ तमिति ॥ शोभना विचारशालिनी धीर्यस्यैवंविधो विनयसहितः शौरिर्वसुदेवः अधमं कुत्सितं ॥ अधमौ न्यूनकुत्सिताविल्यमरः ॥ अतएव दयाविहीनं तं कंसं तादृशं भगिनीहननोद्यतं समवलोक्य इत्थं वक्ष्यमाणप्रकारेण ऊचे इत्यन्वयः ॥ इत्थं कथं ॥ अयि कंस हि निश्चयेन प्रजाः भावीन्यपत्यानि अर्थाद्देवक्याः अहं दास्ये कृपणां दीनां तत्रापि स्वभगिनीं विमुंच स्वजनान्सौख्यसुधया सौख्यामृतेन सिंचेति ॥ वसंततिलका वृत्तं ॥ १५॥

**ग० ॥ तदनंतरं प्रथमान्वर्थितनामा नरादनरदेवो वसुदेवस्य सुधासारवर्षिणीं वाणीं श्रवणसरणिसंचारिणीं विरचय्य स कंटकः कंसइव संकटम पितयोः किल सन्त्यवर्तत॥ ६ ॥**

एवं वसुदेवोक्तं श्रुत्वा कंसो निवृत्तइत्याह ॥ तदनंतरमितिगद्येन ॥



तदनंतरं वसुदेवकर्तृकस्वापत्यदानप्रतिज्ञानंतरं प्रथमान्वर्थितनामा प्रथमं वसुदेववचःश्रवणात्पूर्वमन्वर्थितं भगिनीहननोद्यमेन यथार्थीकृतं नाम येनैवंविधः स नरादानामसुराणां नरदेवो राजा कंस इवेत्याद्यन्वयः स्फुटः ॥ कंटकः क्षुद्रशत्रुः कंटकसदृशदुःखदाता वा अत्र पक्षे कंटकः सूच्यग्रं द्रुमांगं वा ॥ सूच्यग्रेक्षुद्रशत्रौ च रोमहर्षेच कंटकइत्यमरः ॥ ६ ॥

**खलु सुसंगतेः फलमिदम्॥ यद्यपि खं तच्छून्यं नियतं शश्वत्सुवर्णसंयोगात्॥ग्राह्यं सद्भिर्यत्नात्तस्माल्लोके सुसंगतिः श्रेष्ठा॥ १६॥**

नन्वेतावान्क्रूरः खलः कंसो वसुदेववाक्येन कथं निवृत्तइत्याशंक्य सुसंगत्या शून्यहृदयस्य खलस्यापि स्वभावपरिवर्त्तनं भवतीत्याह ॥ खल्विति ॥ सुसंगतेः श्रैष्ठ्यमेवार्थांतरन्यासेनाह ॥ यद्यपीति॥तत्सुखशब्दांतःपाति खं खकाररूपमक्षरं अर्थतोयद्यपि शून्यं नियतं शून्यमेव आकाशार्थकत्वात् अवस्तु ग्रहणानर्हमितियावत् ॥ तथापि इति शेषः ॥ सुइत्येतद्वर्णसंयोगात् सुखरूपं सत् सद्भिर्यत्नाच्छश्वद्ग्राह्यं भवति तस्मात्सुसंगतिः सत्संगः सुइत्येतद्वर्णसंयोगश्च श्रेष्ठो भवति॥अथच तदुपनिषद्वेद्यं खं ब्रह्म॥खं ब्रह्मेतिश्रुतेः॥यद्यपि शून्यं नियतं मनआदिभिरग्राह्यतया शून्यप्रायमेव॥यद्वा शून्यपदाभिधेयं॥महोपनिषदि एषह्येव शून्यइत्युक्तेः ॥ शमूनं कुरुते यस्माददृश्यः सन् परः स्वयं ॥ तस्माच्छून्यमिति प्रोक्त इति महाकौर्मे निर्वचनपूर्वकमुक्तत्वात् च ॥ शं मोक्षसुखं॥ तथापि यद्येतिशेषः॥सुसंगत्येत्यर्थः ॥ शश्वत्पुनःपुनः ॥ सुवर्णेति ॥ परब्रह्मप्र

तिपादकत्वेनशोभना वर्णास्तत्समूहात्मकान्युपनिषद्वाक्यानि तेषां सम्यग्योगादभ्यासात् तद्रूपाद्यत्नात्सद्भिः शुद्धांतःकरणैः पुरुषैर्यस्मा द्ग्राह्यं अपरोक्षतया ज्ञेयं भवति तस्मात्सुसंगतिः सद्गुरुसमागमः श्रेष्ठः अस्तीति शेषः ॥ योवै भूमा तत् सुखमिति श्रुतिप्रतिपाद्यब्र ह्मात्मकस्य सुखस्य सद्गुरुसंगत्यैव सद्ग्राह्यतेत्यर्थः ॥ १६ ॥

**ग० ॥ तदनु वसुदेवः सद्यः स्वसदनं त्वद्यं समासा द्याऽनवद्यः संपद्यमानमनोरथो रथादथोत्तीर्य यदु वर्यः ससुखं संन्यवसत् ॥ ७॥**

तदनंतरं वसुदेवः परिपूर्णमनोरथः सन् स्वगृहं गत्वा सुखेन न्यवस दित्याह ॥ तदन्विति ॥ स्फुटं ॥ ७ ॥

**प० ॥ कालांतरे प्रसुषुवे शुभकीर्तिमंतं सा देव की फलमिवोत्पृथुकीर्तिसुद्रोः ॥ कंसाय दातुमनय द्वसुदेव एनं तस्यालयं स समयादथ सत्यसंधः ॥ १७॥**

अथ कतिषु चिद्दिनेष्वतीतेषु देवकी कीर्तिमंतं नाम पुत्रं सुषुवे त दनंतरं वसुदेवः पूर्वप्रतिश्रुतनिर्वाहाय पुत्रमादाय कंसगृहं गतवा नित्याह ॥ कालांतरइति ॥ समयात् पुत्रदानरूपसंकेताद्धेतोः एनं कीर्तिमंतं कंसाय दातुं तस्य कंसस्यालयमनयदितियोजना॥उदु न्नतः पृथुर्विस्तीर्णो यः कीर्तिरेवसुद्रुः शोभनो वृक्षस्तस्य फल मिव ॥ उत्पृथु इति पृथकूछेदेन फलविशेषणं वा ॥ अतएव तस्य





कीर्तिमानिति नाम ॥ सत्यसंधः सत्यप्रतिज्ञः ॥ वसंततिलका वृत्तं ॥ १७ ॥

**ग० ॥ स पापः पावकोपमं पाकं पश्यन्नपापं तं प्राज्ञं प्रतिज्ञाप्रत्ययप्रसन्नः प्रहसन्निदं प्रत्युत्तरं प्रावोचत् ॥ भो भो वसुदेव सुकुमारेण सुकुमारेण सह त्वं सदनं संप्रयाहि यत्त्वदभिधानाद्यार्धाक्षर द्वयसंख्यासंपूरकाद्युवयोर्गर्भान्मे भयमभयमस्मै दत्तमिति ॥ ८ ॥**

सपापइति ॥ पापरूपोपि सकंसः प्रतिज्ञायाः पूर्वोक्तप्रजासमर्पण रूपायाः प्रत्ययेन प्रत्ययो ज्ञानरंध्रयोरित्युपक्रम्य अधीने निश्चये स्यादाविति हैमोक्तेर्निश्चयेन प्रसन्नः ॥ तथा ॥ पावकोपमं तेजसा ऽग्निसदृशं पाकं पोतः पाकोऽर्भकोडिंभइत्यमरादर्भकं पश्यन् प्रहस न् अपापं प्राज्ञं तं वसुदेवमिदं वक्ष्यमाणं प्रत्युत्तरं प्रावोचदिति यो- जना ॥ इदं किमित्यतआह ॥ भोभोइति ॥ योजना स्पष्टा ॥ सु कुमारेण सौकुमार्यवता सुकुमारेण शोभनेन तनयेन ॥ त्वदिति ॥ यद्यस्मात्तव यदभिधानं वसुदेवइति तस्य यदाद्यार्धाक्षरद्वयं वसुइ ति तत्प्रतिपाद्या या संख्या अष्टत्वसंख्या तत्संपूरकादष्टमादित्यर्थः॥ युवयोर्गर्भान्मे भयमाकाशवाण्या निर्दिष्टमस्ति तत्तस्मादस्मै बाल कायाभयं दत्तं ॥ मयेति शेषः ॥ अग्निसदृशातितेजस्विदेवकीपुत्र दर्शनेन किंचिद्भीतिप्रादुर्भावात् कुमारसौकुमार्यदर्शनेन किंचिद्द याप्रादुर्भावात् वसुदेवस्यैतादृशपुत्रप्रयुक्तमोहनिवृत्तिपूर्वकस्वप्रति

ज्ञासंरक्षणदर्शनेन संतोषाविर्भावाच्च सपुत्रं तमभयदानपूर्वकं विस्र
ष्टवानिति भावः ॥ ८ ॥

**ग० ॥ ततोऽसतस्तादृशीं सद्भिरश्रद्धेयां गां तामपि
श्रुत्वात्युच्छ्रितात्कृच्छ्रान्मानसं नाहो स्वयमानकदुं
दुभिर्निवव्रते ॥ ९ ॥**

ततइति ॥ ततः कंसभाषणानंतरं असतः खलस्य कंसस्य अतएव
सद्भिः साधुभिरश्रद्धेयामविश्वसनीयां तादृशीमभयदानरूपामपि
तां पूर्वोक्तां गां स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले॥लक्ष्यदृष्ट्या
स्त्रियां पुंसि गौरित्यमराद्वाचं श्रुत्वा मानसं अर्थाद्वसुदेवस्यात्युच्छ्रि
तात्कृच्छ्रात्संकटान्ननिवव्रते निवृत्तं नाभूत् ॥ खलभाषणस्यावि
श्वसनीयत्वेन मानसिकं दुःखं तस्य निवृत्तं नाभूदिति भावः ॥ अ
होइतिवितर्के ॥ अहो धिगर्थे शोके चेत्युपक्रम्य असूयायां वित
र्के स्यादिति मेदिन्युक्तेः खलस्यैतस्येदानीमीदृशीवृत्तिः क्षणांतरे क
थं भविष्यतीत्येतादृशवितर्कपूर्वकमित्यर्थः ॥ स्वयमानकदुंदुभिर्वसु
देवो निवव्रते परावृत्तोभूदित्यर्थः ॥ उक्तंच श्रीमद्भागवते॥नाभ्यनं
दत तद्वाक्यमसतोऽविजितात्मन इति ॥ ९ ॥

**प० ॥ नारदकथनाभिज्ञः सकलत्रासक इतो हि स
कलत्रम् ॥ कारागेहस्थं द्रागकारोद्बंधून् प्रदुःखितां
स्तं सः ॥ १८ ॥**

अथ नंदाद्या ये व्रजे गोपा इत्यादिश्रीमद्भागवतोक्तरीत्या नारदो
पदेशेन सर्वेषां देवतारूपत्वं दैत्यहननोद्देशेन भगवंतमवतरिष्यंतं च
ज्ञात्वा देवकीसहितं वसुदेवं झटिति कारागृहे निक्षिप्तवांस्तत्तनयं



च हतवान् सर्वान्बंधूश्चापीडयदित्याह ॥ नारदेति ॥ नारदकथनेन
नारदोपदेशेन अभिज्ञः सर्वेषां देवतांशत्वस्य दैत्यहननोद्देशेन भग
वदवतारस्य च ज्ञाता स कंसः हि यतः सकलत्रासकः इतो हेतोः
सकलत्रं तं वसुदेवं तद्बंधूंश्च द्राक् कारागेहस्थं वचनविपरिणामे
न कारागेहस्थांश्चाकरोत् ॥ श्लेषेण कलाभिः सहितः सकलश्चंद्रः
स्वकुलकूटस्थस्तमपि तद्वंशीयोग्रसेनादिपीडनेन त्रासयतीति तथा-
विधः ॥ योहि स्वकुलकूटस्थमप्युद्वेजयति सभगिनीमुद्वेजयिष्य
तीति किमु वक्तव्यमित्यर्थः ॥ किंच ॥ सकलं चंद्रं त्रायते भगवदु
त्पत्तिद्वारा स्वीयसंरक्षणेनेति सकलत्रस्तं त्रासयतीति किमु वक्त
व्यमित्यर्थः ॥ यद्वा सकलत्रानस्यति क्षिपतीति व्युत्पत्त्या सकल
त्रक्षेपकः ॥ अतएव सकलत्रं कारागेहे क्षिप्तवानिति योग्यमेव ॥
॥ १८ ॥

**ग० ॥ अथो क्रमेण तयोः षट्स्वपि सूतेष्वाशुशुक्ष
णिसदृक्षेषु क्षपितेषु सत्सु ॥ १० ॥**

अथोइति ॥ अथो कारागृहनिक्षेपानंतरं आशुशुक्षणिसदृक्षेषु अ
ग्निसदृशेषु ॥ शिखावानाशुशुक्षणिरित्यग्निपर्यायेष्वमरः ॥ क्षपिते
षु नाशितेषु सत्सु ॥ १० ॥

**प० ॥ शेषाख्योऽशेषजगद्धर्ता तद्गर्भगस्तदा सम
भूत् ॥ निजमस्तकस्थभूमेर्भारं दृष्ट्वा क्षयाय तस्यैव
॥ १९ ॥**

अशेषजगद्धारकः शेषः स्वमस्तकास्थितभूमेर्भारं प्रत्यक्षतोदृष्ट्वा त

रक्षयार्थं सप्तमगर्भधारणवेलायां देवकीगर्भगोऽभूदित्याह ॥ शेषा ख्यइति ॥ स्पष्टं ॥ तदा सप्तमगर्भधारणवेलायां ॥ तस्यैव भारस्यैव क्षयाय क्षयंकर्तुं ॥ स्वमस्तकस्थिताया भूमेः प्रत्यक्षतोदर्शनायोग्य त्वात्तत्रसंचारपूर्वकं दर्शनार्थं तद्गर्भगोऽभूदित्यर्थः ॥ १९ ॥

**तदनंतरम् ॥ हंसवाहनतोषाय कंसपक्षक्षयाय सः॥ शंशयोकथयन्मायां संशयच्छिद्धरिः स्वय म्॥ २० ॥**

तदनंतरमिति ॥ उत्तरान्वयि ॥ हंसवाहनेति ॥ अन्वयः सुगमः ॥ हं सवाहनस्य ब्रह्मणः संतोषाय॥शंशयइति ॥ शं सुखं शये हस्ते य स्य सः ॥ पंचशाखः शयः पाणिरित्यमरः ॥ २० ॥

**ग० ॥ अये देवि देवि देवकात्मजाया देवक्या उदरे दर्शितस्थितेर्देवस्य क्षमाधरणतया कृपावर्षणस्य रणप्रचरणा रातिसंकर्षणस्य नाम्नापि संकर्षणस्या कर्षणं कृत्वा तं रोहिणीगर्भगं कुरु ष्वद्राक्॥ १९ ॥**

यदकथयत्तदाह ॥ अयेइत्यादिना ॥ अन्वयः स्फुटः ॥ देविदेवीति संभ्रमे द्विरुक्तिः ॥ क्षमायाः पृथ्व्या अथच क्षांतेर्धरणस्तस्य भाव स्तत्ता तया हेतुभूतया ॥ नंद्यादित्वाल्ल्युः ॥ स्वशिरःस्थिताया भूमेः पीडादर्शनेन कृपाविष्टतया तन्निवारणाय गर्भवासोप्यंगीकृतोदेवे नेति कृपातिशयः सूचितः ॥ रणेति॥रणे प्रचरणेन संचरणेनाराती नां शत्रूणां सम्यक्कर्षणकर्तुः ॥ तं शेषाख्यं देवं रोहिण्या नंदगृहे स्थापिताया वसुदेवपत्न्याः गर्भगं ॥ १९ ॥



**अन्यच्च ॥ प० ॥ यशोदस्य साक्षान्ममाज्ञानुसारा यशोदोदरे त्वं कुरुष्व स्थितिं हि॥ नरास्त्वां विधा नैर्विधेर्वारिपुष्पादिभिः पूजयिष्यंति लोके धृता शाः॥ २१ ॥**

अन्यच्चेति ॥ यशोदस्येति ॥ अन्वयः सुगमः ॥ यशोदस्य यशः की र्तिं ददातीति तथाविधस्य साक्षात् मम॥विधीयतइति विधिर्विधे यं तस्य जपादेर्विधानैरनुष्ठानैः ॥ भुजंगप्रयातं वृत्तं ॥ भुजंगप्रया तं भवेद्यैश्चतुर्भिरिति तल्लक्षणात् ॥ २१ ॥

**ग० ॥ अहं स्वयमपि भूमिभूतभरस्य भूरितरस्य भंजनाय भक्ताभयाय भविष्यामि भवनआनक दुंदुभेरिति ॥ १२ ॥**

अहं वसुदेवगृहे भविष्यामीति सप्रयोजनमाह ॥ अहमिति ॥ स्प ष्टं ॥ स्वयं साक्षादेव नत्वंशादिना ॥ उक्तंच ॥ वसुदेवगृहे साक्षाद वतीर्णः परः पुमानिति ॥ कृष्णस्तु भगवान् स्वयमितिच ॥ १२॥

**प० ॥ मेशेन माया संप्रोक्ता शेषेणाशेषतोऽवितुं कार्येण सा प्रवव्रते तं तदा तत्क्षणं क्षितौ॥ २२ ॥**

एवं भगवताऽऽज्ञप्ता माया किमकरोत्तदाह ॥ मेशेनेति ॥ मायाः लक्ष्म्या ईशेन विष्णुना संप्रोक्ता सम्यगुक्ता माया तदा आज्ञोत्त रकाले अशेषेण परिपूर्णेन कार्येण कृत्वा अशेषतः कात्स्न्येन तं भगवंतं अवितुं प्रीणयितुं यद्वा शेषेण देवकीगर्भाद्विनिमितेन शे षावतारेण बलरामेण अशेषतः अशेषकार्येणच तं अवितुं ॥ सार्व

विभक्तिकस्तसिः ॥ अवरक्षणेत्यादिदंडकपाठेऽवधातोः प्रीत्यर्थक
त्वश्रवणात् ॥ तत्क्षणं तस्मिन्नेवक्षणे क्षितौ प्रवव्टते प्रवृत्ताऽभूत् ॥
यद्वा अशेषतः अशेषं कार्यमुद्दिश्य संप्रोक्तेत्यन्वयः ॥ ल्यब्लोपे
पंचमी ॥ तत्क्षणमिति तमित्यस्य विशेषणं वा॥ तस्मिन्नुपादिष्टे का
र्ये विषये क्षण उत्सवो यस्येत्यर्थः ॥ अथ क्षण उद्धर्षो मह इद्धव
उत्सव इत्यमरः ॥ २२ ॥

ग० ॥ सा क्रमेण कृतकृत्या चाऽभूत्॥ अथ प्रभुः
प्रशंस्ये नभस्ये मासे तारमणिस्थपुटितेंद्रनीलनि
र्मितवितानइव तमःसांद्रनिर्मलनक्षत्रचक्रप्रचुरे
व्यभ्रे ऽभ्रे भाविनिजनाथापत्यसुखदातृत्वं संस्मृ
त्येव प्राचीप्रांते त्वयात्मदेवतापूज्यत्वमाज्ञायेव द
क्षिणदिङ्मुखे भाव्यात्मीयाधिष्ठातृगृहपवित्रीकर
णं विज्ञायेव प्रतीचीप्रदेशे स्वपालकतनूभवभवि
ष्यत्कृतार्थतां संस्मृत्येवोदीचीदेशे प्रसन्ने सगर्भा
देवकीं दृष्ट्वा स्वयमपि सुरवर्त्मस्थतनुजनामवाच्य
तां गर्भगांकुर्वत्यां सत्यां क्षित्यां नानाद्रुमकुसुमा
विरलधवलमुकुलमिषेण सस्मितासु वनराजि
षु नैजवृंदपरिवृढजान्हवीजनकजननजातानंदेन
नदीषु स्वच्छामृतासु तद्दर्शनायोन्मीलितैर्विलो
चनैरिव चंचच्चंचरीकचयाऽचिंतदीनमीनसंचार
चलज्जलसुपरिमलविमलकमलकुलैर्ह्रदेषु ह्रदस



मुदायेषु सदा मत्सुतानुरक्त इति विचार्यैव सुस्प
र्शसामोदेषु समीरेषु प्रवहत्सु गांडीवभृत्साहाय्ये
न खांडवदावदहनदानतोषं करिष्यतीति द्विजेभ्यो
दक्षिणाशां प्रदर्शयत्स्विव जवात्प्रदक्षिणं ज्वल
त्सु ज्वलनज्वालाजालेषु दृष्ट्यगोचरोऽप्यस्मत्तुष्टये
तद्गोचरः स्यादिति साल्हादेषु भक्तमानसेषु शश्व
दंतर्गतसमरमदसगदर्दैत्यकदनेनागदं मद्गुदरं वि
धास्यति तदभिधानादिमवर्णरहितवाच्यमपि ग्र
हीष्यति सद्गुपदात्वेन मुदेत्येवं मनसि निधायेव
मंदं मंदं मोदेनोदन्वति नदति निबिडांधकारभि
या स्तनितसहाय्येनेव देवदुंदुभिनिनदेषु संचरत्सु
तोयासारासूययेव दिवि दिविषत्करमुक्तपारिजा
तपुष्प्यत्पुष्पप्रकरवृष्टिषु प्रपतंतीषु रासोत्सवस
मयसंविधेयसेवां सूचयत्स्विव सुखं सुरनर्तकेषु
नृत्यत्सु स्वकीयतनयप्राक्स्थितिस्थानमवलोक
यितुं समागतायां सद्गोकुलस्थतत्सपत्नजनन्या
मिव तन्नामाभिधेयशुभतारायां स्वीयवंशावतं
सशंस्यकंसारातिसंभवसामयिकसुषमासमूहसं
पदं संद्रष्टुकामे सोमेतं द्रुतं संश्लेष्टुं कृतकरप्रसारे
शुभंयुगुणगणार्णवे काले कुलकूटस्थापूर्णतास

**हिष्णुतयेव धृतमहामणिव्राताभीषुभरेण सुधांधोध्वांतं प्रोद्भूतं प्रणाशयन् कौस्तुभच्छलेन हृद्गतं वरं करुणांकुरं प्रकाशयन् पीतवस्त्रो नलिननेत्रस्तत्र स्वयं पूर्णपुरुषोत्तमः प्रादुरासीत्॥ १३॥**

सेति॥क्रमेण सा कृतकृत्या कृतं कृत्यं भगवदुपदिष्टदेवकीगर्भाकर्षणरूपं स्वस्यायशोदोदरस्थितिरूपं च कार्यं ययेत्येवंभूताऽभूत् ॥ अथ श्रीभगवत्प्रादुर्भावसमयसंजातान्यथसर्वगुणोपेतइत्यादिश्लोकाष्टकेन श्रीमद्भागवतोपवर्णितानि दिक्प्रसादादीन्युत्प्रेक्षापूर्वकं क्रमेण वर्णयन् श्रीभगवत्प्रादुर्भावमाह ॥ अथेत्यादिना गद्येन ॥ अथ मायाकृतगर्भविनिमयानंतरं ॥ प्रशंस्ये स्तुत्ये ॥ एतिस्त्विति सूत्रे शंसिदुहिगुहिभ्योवेति काशिकावचनात्क्यब्विकल्पे पाक्षिको ण्यत् ॥ नभस्ये मासे भाद्रपदे शुभंयुगुणगणार्णवे शुभंयुस्तुशुभान्वितइत्यमरात् शुभान्विता ये गुणगणा दिक्प्रसादादयस्तेषामर्णवइवार्णवस्तस्मिन्काले ॥ शुभतमगुणगणपरिपूर्णे काले इत्यर्थः॥ प्रभुर्निग्रहानुग्रहसमर्थः पूर्णपुरुषोत्तमस्तत्र वसुदेवगृहे स्वयं प्रादुरभूत् प्रकटोऽभूत् ॥ पूर्णेति स्वयमिति पदाभ्यामंशावतारत्वं निरस्तं ॥ कीदृशः॥ पीतेति ॥ स्पष्टं॥ तथा ॥नलिनेति॥ नलिनं कमलं॥ स्पष्टं ॥ किं कुर्वन् ॥ कुलकूटस्थस्य चंद्रस्य या अपूर्णता कृष्णाष्टमीवशान्न्यूनता तद्विषये याऽसहिष्णुता असहनशीलत्वं तयेवेत्युत्प्रेक्षा ॥ धृतो योमहामणिव्रातोऽनर्घ्यमणिगणस्तस्य येअभीषवः किरणास्तेषां भरेणातिशयेन सुधांधोऽध्वांतं सुधांधसां देवानां यो





ध्वा आकाशः तदंतं देवमार्गपर्यंतं प्रकर्षेणोद्भूतं ध्वांतंतमः प्रकर्षेण नाशयन् ॥ तथा ॥ कौस्तुभच्छलेन कौस्तुभमिषेण हृद्गतं हृदिस्थितं वरं देवाहृते वरः श्रेष्ठे इत्यमरात् श्रेष्ठं करुणांकुरं प्रकाशयन् ॥ हृदि धृतोयं कौस्तुभो न भवति किंत्वंतःस्थितकरुणांकुरएवेति भावः ॥ कस्मिन् सति ॥ तारेति ॥ताराः तारोवानरभिन्मुक्ताविशुध्योः शुद्धमौक्तिकइति मेदिनीकोशात् शुद्धमौक्तिकानि मणयः पद्मरागादयस्तैः स्थपुटितं खचितं यदिंद्रनीलनिर्मितं वितानं तस्मिन्निव व्यभ्रे विगतमेघे अभ्रे आकाशे तमःसांद्रे ऽतएव निर्मलेन नक्षत्रचक्रेण प्रचुरे सति व्याप्ते सतीत्यर्थः ॥ तमस्विन्यां नक्षत्राणां प्रचुरप्रकाशोऽनुभवसिद्धः ॥ तथा ॥ भावीति ॥ भावियत् निजनाथस्य इंद्रस्यापत्यमर्जुनस्तत्सुखदातृत्वं संस्मृत्येवेत्युत्प्रेक्षा ॥ प्राचीप्रांते प्रसन्ने सति॥अस्योत्तरत्र त्रितयेप्यन्वयः॥ तथा॥ आत्मेति ॥ आत्मनो या देवता यमरूपा तस्याः पूज्यत्वं तन्निरूपितं भगवन्निष्ठं पूज्यत्वं ॥ आज्ञायेव दक्षिणदिङ्मुखे प्रसन्नेसति॥ यमस्य परमवैष्णवत्वेन स्वोपास्यदैवतत्वात् स्वभगिनीपतित्वाच्च भगवतः पूजार्हत्वं ॥ तथा॥ भावीति ॥ भाविअग्रेभविष्यत् द्वादशीनिमित्तकस्नानवेलाहृतनंदप्रत्यानयनार्थमागमिष्यता भगवता यदात्मीयाधिष्ठातुर्वरुणस्य गृहपवित्रीकरणं तत् ॥ विज्ञायेव प्रतीचीप्रदेशे प्रसन्नेसति ॥ तथा॥स्वेति ॥ स्वस्याः पालकः कुबेरस्तस्य यौ तनूभवौ नलकूबरमणिग्रीवाख्यौ तनयौ तयोर्भविष्यंती या कृतार्थता नारदशापजनितवृक्षजन्ममोचनेन कृतकृत्यता तां ॥ संस्मृत्येव उदीचीदेशे प्रसन्नेसति ॥ किंच ॥ देवकीं सगर्भां दृष्ट्वा क्षित्यामपि मह्यामपि सुरवर्त्मन्याकाशे तिष्ठतीत्येवं भूतो यस्तनुजो मंगलाख्य

स्तनयस्तस्य यन्नाम मंगलेति तद्वाच्यं यत्कल्याणं तस्य भावस्त
त्ता तां गर्भगां कुर्वत्यां सत्यां ॥ नानाविधमंगलयुक्तायामितिया
वत् ॥ तथा ॥ वनराजिषु वनपंक्तिषु ॥ नानेति ॥ अनेकविधवृक्ष
कुसुमघनधवलमुकुलमिषेण सस्मितासु सतीषु ॥ स्मितस्य शुभ्र
त्वं कविसमयसिद्धं ॥ तथा ॥ नदीषु ॥ नैजेति ॥ निजमेव नैजं
स्वीयं यद्वृंदं समूहस्तस्य परिवृढाप्रभुरूपा सर्वातिशायिसामर्थ्यव
त्त्वेनातिश्रेष्ठेत्यर्थः ॥ एवंविधा या जान्हवी गंगा तस्या यो जनकः
पिता भगवान्विष्णुस्तस्य यज्जननं तेन हेतुभूतेन जातोय आनंद
स्तेन कृत्वा स्वच्छामृतासु निर्मलजलासु सतीषु ॥ विष्णोर्जान्हवी
पितृत्वं च तस्यास्तच्चरणनिसृतत्वाद्बोध्यं ॥ तथा ॥ न्हदसमुदा
येषु जलाशयसंघेषु॥चंचदिति ॥ चंचंतो ये चंचरीका भ्रमरास्तेषां
चयेन समूहेनांचितानि तथा दीनाः दीना स्त्री मूषिकस्त्रियां ॥ वा
च्यवद्दुर्गते भीते इति मेदिनीकोशात् भीता ये मीनाः स्वल्पमत्स्या
स्तेषां संचारेण चलंति किंचित् चंचलानि जलसंबंधीनि सुप
रिमलानि विमलानि च यानि कमलानि तेषां कुलैर्येषु
रम्येषु सत्सु ॥ कमलविषये उत्प्रेक्षते ॥ तदिति ॥ तस्य भगव
तो दर्शनायोन्मीलितैरुद्घाटितैर्नयनैरिव ॥ तथा ॥ समीरेषु वायुषु
प्रवहत्सु सत्सु ॥ सोत्प्रेक्षं शैत्यसौगंध्यगुणवैशिष्ट्यबोधकं वायुविशे
षणमाह ॥ सदेति ॥ सदा सर्वदा श्रीभगवानित्यर्थात् मत्सुते रामा
वतारे हनूमति इहावतारे भीमे चानुरक्तः सस्नेह इति विचार्यैव सु
स्पर्शसामोदेषु उत्तमस्पर्शातिनिर्हारिसुगंधयुक्तेषु ॥ अथच सुतानु
रागदर्शनेन सुस्पर्शेषु सहर्षेषुच ॥ तथा॥ ज्वलनज्वालाजालेषु प्रद
क्षिणं यथा स्यात्तथा जवात् ज्वलत्सु सत्सु ॥ उत्प्रेक्षते ॥ गांडीवेति



गांडीवभृदर्जुनस्तस्य साहाय्येन खांडवाख्यो यो दावः दवदावौ व
नारण्यवन्ही इत्यमरात् वनं तस्य यत् दहनं तद्दानेन कृत्वा यः सं
तोषस्तं करिष्यतीति हेतोर्द्विजेभ्यो ब्राह्मणेभ्यो दक्षिणाशां दक्षिणां
दिशं लक्षितलक्षणया ब्राह्मणेभ्यो देयदानरूपाया या आशा तां प्र
दर्शयत्स्विव ॥ अग्नयः प्रदक्षिणं न ज्वलंति किंतु यदा श्रीभगवा
नर्जुनसाहाय्येन खांडवं दग्धुं दास्यति तदा संतोषेण भवद्भ्यो दक्षि
णां दास्याम इति आशाजननं कुर्वत्स्विवेत्यर्थः॥तथा ॥ दृष्टिगोच
रइत्यादि ॥ स्फुटं ॥ तद्गोचरो दृष्टिविषयः ॥ तथा ॥ उदन्वति समु
द्रे मोदेन हर्षेण मंदं मंदं नदति गर्जति सति ॥ मोदे हेतुमुत्प्रेक्षते ॥
शश्वदिति ॥ शश्वन्निरंतरमंतर्गतः समरमदेन संग्रामगर्वेण सगदो ग
दायुधविशिष्टस्तद्रूपगदसहितो वा यो दैत्यः पंचजनाख्यस्तस्य क
दनेन हननेन मदुदरं अगदं दैत्यरूपरोगनाशनेन नीरोगं तद्गदाया
अपि दुःखदातृत्वात्तद्रहितं वा विधास्यति करिष्यति ततश्च मुदाह
र्षेण ॥ तदिति ॥ तस्योदरस्य यदभिधानं तस्य य आदिमवर्ण उ
कारस्तद्रहितो दरशब्दस्तस्य यो वाच्यः शंखस्तमपि पांचजन्यम
पीतियावत् सदुपदात्वेनोत्तमोपायनत्वेन ग्रहीष्यतीति मनसि निधा
येव ॥ तथा॥ स्तनितस्य मेघगर्जितस्य साहाय्येन देवदुंदुभिनिन
देषु संचरत्सु सत्सु ॥ स्तनितसाहाय्ये हेतुमुत्प्रेक्षते ॥ निबिडेति ॥
अत्रेवशब्दो योज्यः निशीथे तमउद्भूते इत्यनेन तद्वेलायां निबिडां
धकारकथनात् ॥ तथा ॥ दिवि आकाशे तोयासारासूययेव मेघ
कृतबलवज्जलवर्षणेर्ष्ययेव ॥ दिविषदिति ॥ दिविषदां देवानां करैर्मु
क्ता याः पारिजातस्य कल्पवृक्षस्य संबंधिनां विकसतां पुष्पाणां स
मूहस्य वृष्टयस्तासु प्रकर्षेण पततीषुसत्सु ॥ पुष्पाणांपुष्प्यदितिवि

शेषणेनामोदातिशयः सूच्यते ॥ तथा ॥ सुरनर्तकेषु रासोत्सवसमये सम्यग्विधेया या सेवा तां सूचयत्स्विव॥ यथेदानीं नृत्यादिकं विधीयते ऽस्माभिरेवमेव रासक्रीडासमारंभे सेवोपयोगितया क्रियमाणं श्रीमतांऽगीकर्त्तव्यमिति बोधयत्स्विवेत्यर्थः ॥ सुखं यथा स्यात्तथा नृत्यत्सु सत्सु ॥ तथा ॥ स्वकीयतनयस्य बलरामस्य यत्प्राक् प्रथमं स्थितिस्थानं देवकीरूपं तद्विलोकयितुं समागतायां कंसभयाद्वसुदेवेन गोकुले स्थापितत्वात्सद्गोकुलस्था या तस्य श्रीकृष्णस्य सपत्नजननी रोहिण्याख्या तस्यामिवेत्युत्प्रेक्षा ॥ तन्नाम्ना रोहिणीत्येवंरूपेण अभिधेया वाच्या या शुभतारा शुभनक्षत्रं रोहिण्याख्यं तस्यां समागतायां सत्यां॥ रोहिणीनक्षत्रयुक्ते समये इत्यर्थः ॥ रोहिण्याः शुभत्वं तत्पतिना तारारमणेन तदादिस्वनाम्नो रोहिणीरमण इत्येवंरूपस्य धृतत्वाद्भगवज्जननीनामत्वाच्च बोध्यं ॥ तथा स्वीयवंशस्यावतंसः शिरोभूषणभूतः शंस्यः स्तुत्यो यः कंसारातिः श्रीकृष्णस्तस्य यः संभवः प्रादुर्भावस्तत्समयप्राप्तो यः सुषमासमूहः परमशोभासंघस्तत्संपदं सम्यक् द्रष्टुकामे सोमे चंद्रे तं श्रीकृष्णं संश्लेष्टुमालिंगितुमिवेति लुप्तोत्प्रेक्षा ॥ कृतकरप्रसारे कृतकिरणप्रसारे ॥ अथच॥ कृतहस्तप्रसारेसति ॥ एवंविधानेकसमयगुणसंपत्तिः श्रीमद्भागवतानुकूलैवानुसंधेया ॥ १२ ॥

**अनंतरं ॥ प० ॥ सांद्रांबुदप्रभममुं दरचक्रकंज कौमोदकीधरमसौ वसुदेव आरात् ॥ वीक्ष्याऽलकप्रकरशोभिमुखं तदा द्राक् शोणाऽधरद्युतिसुपाटलितस्मितं तम् ॥ २३॥**



**हर्षोद्धर्षध्वस्तक्लेशाधिः संप्लुतः सुखाऽब्धिवरे॥ स्तुत्वा सस्त्रीकः प्राग्विप्रेभ्यो ऽदात्सुगोगणं मनसा ॥ २४॥**

अनंतरमिति ॥ उत्तरान्वयि ॥ प्राग्भवीयसंस्कारोद्बोधनोद्देशेन शंखाद्यायुधविशिष्टचतुर्भुजादिमदाकृतिविशिष्टं श्रीभगवंतमेव प्रादुर्भूतं दृष्ट्वा आनंदसमुद्रे निमग्नो देवकीसहितो वसुदेवो देवं स्तुत्वा ब्राह्मणेभ्यो मानसिकं गोदानं कृतवानित्याह ॥ सांद्रांबुदेत्यादिना युग्मेन ॥ तं एतावत्कालपर्यंतं परोक्षं अमुं इदानीमपरोक्षं भगवंतं आरात् समीपे वीक्ष्य तदा सुखरूपे अब्धिवरे समुद्रश्रेष्ठे संप्लुतः कृतावगाहनः ॥ दुःखासंभिन्नसुखसमुद्रमग्नइत्यर्थः॥ अतएव हर्षोद्धर्षेणानंदातिशयेन ध्वस्ताः क्लेशाः शारीराः तत्सहिता आधयो मानस्यो व्यथाश्च यस्यैवंभूतः सस्त्रीको देवकीसहितो वसुदेवो भगवंतं स्तुत्वा विप्रेभ्यः कारागारनिरुद्धत्वेन प्रत्यक्षतोगोदानासंभवात् मनसैव उत्तमं गवां गणं शीघ्रं अदात्॥अब्धिवरे संप्लुत इत्यनेन पुत्रजननकालिकस्नानविधिः स्मृत्युक्तः संगृहीतः॥कीदृशममुं॥सांद्रेति॥ स्पष्टं ॥ पुनः कीदृशं ॥ दरेत्यादि ॥ दरःशंखः ॥ कंजंपद्मं कौमोदकी गदा शेषं स्फुटं ॥ सायुधदर्शनेन क्रूरत्वशंकाव्यावृत्तये विशेषणांतरमाह ॥ शोणेति ॥ शोणो रक्तवर्णो यो ऽधरस्तस्य द्युत्या अत्यंतं पाटलितं संजातपाटलं पाटलं कृतं वा स्मितं यस्य तं॥एतेन प्रसादातिशयो ध्वनितः ॥ पुनः कीदृशं॥ अलकेति॥ स्पष्टं ॥ प्रथमश्लोके वसंततिलका द्वितीये गीतिरार्या वृत्तं॥ २३ ॥ २४ ॥

**ततः परं बहुकार्यचिकीर्षुणा प्रभुणा॥ प० ॥ अव**

**तारत्रयमुक्तं तस्मैनोचे प्रभुः प्रसंगवशात्॥ माभू**
**द्वियोगदुःखस्मरणं कर्त्तुं तथैव रामकथाम्॥२५॥**

ततइत्यादि ॥ इदमप्युत्तरान्वयि ॥ अथ त्वमेव पूर्वसर्गे ऽभूरित्यादिना श्रीमद्भागवते पृश्निगर्भोपेंद्ररूपावतारद्वयं प्रकृतावतारश्चेति त्रितयमुक्तं ॥ मध्यपातित्वात्प्रसंगप्राप्तोपि रामावतारो नोक्त इति तत्तात्पर्यं वर्णयति ॥ अवतारेति ॥ बहुकार्यचिकीर्षुणा प्रभुणा तस्मै वसुदेवायावतारत्रयं पृश्निगर्भोपेंद्रश्रीकृष्णरूपं उक्तं परंतु प्रसंगवशात् प्रभुः रामकथां वियोगदुःखस्मरणं माभूदिति हेतोर्नोचे ॥ ननु भवतु तत्स्मरणं किं तेनेति चेत्तत्र हेतुमाह ॥तथैवेति॥ तथैव वियोगदुःखमेव कर्तुं ॥ अस्मिन्नप्यवतारे इदानीमेव गोकुलगमनेन वियोगदुःखं देयमस्तीति वियोगदुःखस्मरणनिवृत्तये रामकथां नाकथयदित्यर्थः ॥ २५ ॥

**प्रभुणा चान्यदेवमाज्ञप्तो वसुदेवः ॥ श्रीगोकुलसं**
**कुलमयि गोकुलमधुना सुनंदगोपगृहात्॥ नय मा**
**मानय तनयां तदनामयमाविधेहि वसुदेव॥ २६**

प्रभुणेति ॥ कार्यमितिशेषः ॥ एवं वक्ष्यमाणप्रकारेण अन्यदपि कार्यंप्रति वसुदेव आज्ञप्तः ॥ श्रीगोकुलेति ॥ अयि वसुदेव अधुना मां श्रीगोकुलसंकुलं श्रिया वस्त्राभरणपरिजनादिसंपत्त्या गोकुलेन धेनुव्रजेन च संकुलं व्याप्तं॥एतेन मल्लालनपोषणचिंतां माकुर्वितिसूचितं॥एवंविधं गोकुलं नय॥सुष्ठु शोभनात् नंदगोपगृहात् तनयां आनय तदनामयं तस्य नंदस्य अनामयं अनपत्यत्वदुःखराहित्यं आविधेहि ॥ २६ ॥



**ग० ॥ तदनु तदनुज्ञया दनुजकदनसुखसदनानि**
**जनंदनवदनचंद्रस्यंदितमंद्रप्राक्तनोदंतामृतं द्रुतं**
**तत्र श्रोत्रपात्रे निधाय तत्तेजस्तिरस्कृतकृत्स्नसां**
**द्रतमतमसेव प्रतिहारनेत्रेऽत्रापिहिते तत्कृतस्वी**
**यानुकरणेर्ष्ययेव तदीयपूर्वस्थित्यनुकूले कारागा**
**रद्वारे सति तत्सामयिकांतर्वर्त्तिहर्षइव स्वयमयम**
**पि विश्रृंखलः खलु शौरिस्तदा मुदा तद्गृहाद्बहिर्नि**
**रगात्॥ १४ ॥**

तदन्विति ॥ तदनु भगवदुक्त्यनंतरं तदनुज्ञया तस्य भगवतोऽनुज्ञया शौरिर्वसुदेवस्तदा खलु तदैव मुदा हर्षेण तद्गृहात्कारागाराद्बहिर्निरगादित्यन्वयः ॥ कीदृशः ॥ तत्सामयिकांतर्वर्त्तिहर्षइव जन्मसमयप्राप्तस्वांतःकरणसंबंधिहर्षइव स्वयमपि विश्रृंखलः श्रृंखलाराहितः॥ हर्षपक्षेअप्रतिबंधः ॥ जन्मसमयसंजातोहर्षोयथा निरर्गलस्तथा स्वयमपि निरर्गलइत्यर्थः ॥ किंकृत्वा ॥ दनुजेति ॥ दनुजकदनो दानवनाशकः सुखसदनं परमानंदगृहं एवंविधोयोनिजनंदनोनिजतनयस्तस्य यद्वदनं सएव चंद्रस्तस्मात्स्यंदितं प्रस्रुतं मंद्रं गंभीरं यत्प्राक्तनोदंतरूपं अवतारत्रयकथारूपं अमृतं तत् द्रुतं शीघ्रं तत्र श्रोत्रपात्रे निधाय ॥ तत्र कारागृहइतिवा ॥ श्रीभगवदुक्तं सादरं श्रुत्वेत्यर्थः ॥ वार्त्ता प्रवृत्तिर्वृत्तांत उदंतः स्यादित्यमरः ॥ कस्मिन्सति ॥ तदिति ॥ तस्य भगवतोयत्तेजस्तेन तिरस्कृतं कृत्स्नं संपूर्णं सांद्रतमं निबिडतमं यत्तमस्तेनेवेत्युत्प्रेक्षा॥अत्र समये प्रतीहारनेत्रे द्वारपालनेत्रे पिहिते आच्छादिते सति॥प्रतीहारनेत्रपिधानं न निद्रया

किंतु श्रीभगवत्तेजस्तिरस्कृतेनानवकाशेन कारागृहतमसैवेत्यर्थः॥ तथा॥कारागारद्वारे॥तदिति॥तैर्नैत्रैः कृतं यन्मीलनेन स्वीयानुकरणं तत्प्रयुक्तेर्ष्ययेवेत्युत्प्रेक्षा ॥तदीयेति॥तदीयाप्रतीहारनेत्रसंबंधिनीया पूर्वस्थितिरुद्घाटनरूपा तस्या अनुकुलेसति॥पिधानस्य मुख्यस्वधर्मत्वेन तस्य च प्रतीहारनेत्रैरनुकृतत्वेन तदीर्ष्ययोद्घाटनरूपतत्पूर्वस्थितिमंगीकुर्वत्सु उद्घाटितेषु सत्स्वित्यर्थः॥ १४ ॥

**प० ॥ जनकानुजवात्सल्यान्महीधराहिः फणातपत्रेण॥ प्रभुशिशुनाट्यं द्रष्टुं वारिदवृष्टिं निवारयितुमागात्॥ २७॥**

शेषोऽन्वगाद्वारिनिवारयन्फणैरिति श्रीमद्भागवतोक्तं शेषानुगमनमुत्प्रेक्षापूर्वकं वर्णयति ॥ जनकेति ॥ महीधराहिःशेषः जनकानुजवात्सल्यात् बलरामस्यशेषावतारत्वात्तज्जनकोवसुदेवः अनुजः श्रीकृष्णः तयोर्वात्सल्यात्स्नेहादिवेति लुप्तोत्प्रेक्षा ॥ फणातपत्रेण वारिदवृष्टिं मेघवृष्टिं निवारयितुं ॥ तथा॥वस्तुतः प्रभोर्भगवतः शिशुनाट्यं च द्रष्टुमागात् ॥ २७ ॥

**ग० ॥ततः पयः पूरपंकिलतया आश्चर्यचर्यांचिततपश्चर्यां प्रदर्शयंतीं वरणस्रजमिवावर्त्तशतमालां बिभ्रतीं तां कालिंदीं किलानकदुंदुभिःशनैः शनैराजगाम॥ १५॥**

ततइति ॥ ततः किलानकदुंदुभिर्वसुदेवः शनैः शनैः कालिंदीं यमुनामाजगामेत्यन्वयः ॥ कीदृशीं कालिंदीं ॥ पयःपूरपंकिलतया





पयःपूरेणोदकपूरेण या पंकिलता कर्दमयुक्तता तया कृत्वा आश्चर्यचयेनापि कर्त्रा अंचिता पूजिता परमाश्चर्यकर्त्रीतियावत् ॥ एवंविधा या तपश्चर्या श्रीभगवत्प्राप्त्यर्थं स्वीयंतपआचरणं तां प्रदर्शयंतीमिव स्थितामिति लुप्तोत्प्रेक्षा ॥ निश्चलतया स्थित्वा तपःकरणे जलरेणुसंपर्कवशात् शरीरे पंकिलत्वं भवतीति प्रसिद्धं ॥ तथा ॥ वरणस्रजमिव वरणार्था या स्रङ्माला तामिवावर्तशतमालां स्यादावर्तोऽभसां भ्रम इत्यमरादंभोभ्रमाणां यच्छतं तस्य या माला परंपरा तां बिभ्रतीं धारयंतीं ॥ अभ्यस्तत्वान्नुमभावः ॥ ॥ १५ ॥

**प० ॥ पत्युः पादयुगं तत् द्रष्टुं स्प्रष्टुं सखीनिदानतया॥ प्रोन्नतपूरा यद्यपि सरला विरला च सत्स्नुषा व्यभवत्॥ २८॥**

पत्युरिति ॥ पत्युः श्रीकृष्णस्य तत् प्रसिद्धं पादयुगं सखीनिदानतया सख्यागंगायानिदानतया उत्पत्तिकारणत्वेनेव द्रष्टुं तथा स्प्रष्टुं यद्यपि प्रोन्नतपूरा तथापि हि यतः सत्स्नुषा अतः सरला अकुटिला विरला विभागवती चाभवत् ॥ लोकेपि काचित्सती पतिपाददर्शनस्पर्शनेच्छया सहर्षमग्रे प्रवृत्तापि श्वशुरं दृष्ट्वा लज्जावशान्निवृत्ता भवति तद्वदियमपीत्यर्थः ॥ २८ ॥

**शमनभगिन्यतिनमनं दृष्ट्वा तज्जीवनं तदा शौरिः॥ तत्सुषमां परिमातुं प्रविवेशाशु स्नुषेति तनयेन॥ २९॥**

शमनेति ॥ तदा श्रीयमुनाप्रवाहखर्वीभावसमये शौरिर्वसुदेवः शमनभगिन्यतिनमनं शमनोयमराड्यमइत्यमरात् शमनस्य यमस्य या भगिनी यमुना तस्या अतिनमनमतिप्रव्हीभावस्तदृष्ट्वा इयं भाविनी स्नुषेति हेतोस्तत्सुषमां बहिरतिप्रव्हीभावादिजनितां परमशोभां परिमातुं इयं अंतःशुद्धभावान्विता नवेति निश्चयपूर्वकं ज्ञातुं तनयेन सह तज्जीवनं तस्या यमुनाया जीवनमुदकं अथच जीवनोपलक्षितं हृदयं आशु प्रविवेश ॥ अयंभावः ॥ हिंस्रेष्वतिनमनमवश्यं हिंसाजनकं मृगयादिवेलायां चित्रमृगधनुरादौ प्रसिद्धतरं ॥ अत्रच शमनभगिनीपदेन लोके प्रायशः सहोदरयोरेकस्वभावत्वदर्शनेन यमुनायांहिंस्रस्वभावत्वसंभावनया एतस्या अतिनमनं किमर्थमिति भाविस्नुषात्वादेतस्या अवश्यमेव हृदयं ज्ञातव्यमित्यभिप्रायवान्वसुदेवस्तस्या जीवनोपलक्षितं हृदयं परीक्षितुमिव निजतनयेन साकं प्रविवेशेति ॥ २९ ॥

**ग० ॥ अथ क्रमेण प्रथमदर्शनपादस्पर्शननमस्करणायेवैतत्तनयस्येवास्यापि पदपद्ममकरंदायमाना मत्सरवी काचिद्वर्तते किमित्यपि समालोकयितुमिव जानुयुगावलंबिन्या विकर्त्तनतनयतरंगिण्याः प्रतीरमुत्तीर्य धैर्यधरः शौरिः प्रसुप्तव्रजे श्रीमद्गोकुले प्रयत्नात्सनंदनः सानंदं नंदसदनमविंदत॥ १६ ॥**

अथेति ॥ अथ श्रीयमुनाप्रवाहप्रवेशानंतरं ॥ सनंदनः सपुत्रः शौ



रिः वसुदेवः अतएव धैर्यधरःसन् प्रसुप्तव्रजे श्रीमद्गोकुले प्रयत्नादायासात् ॥ निशीथसमये परगृहस्य दुष्प्रवेशत्वात् ॥ नंदसदनं प्रति सानंदं यथास्यात्तथा अविंदत प्रविष्टोभूत् ॥ यद्वा ॥ अप्रयत्नादितिच्छेदः ॥ यतः प्रसुप्तव्रजं गोकुलं स्वयं च शौरिर्धैर्यधरः अतएव प्रयत्नराहित्येन प्रविष्टोऽभूदित्यर्थः ॥ किंकृत्वा॥ विकर्त्तनेत्यादि ॥ स्फुटं ॥ कीदृश्याः ॥ जान्विति ॥ जानुयुगावलंबनविषये उत्प्रेक्षते ॥ क्रमेणेत्यादि ॥ प्रथमदर्शने पादस्पर्शपूर्वकं नमस्कारं कर्तुमिवेत्यर्थः ॥ पुनरुत्प्रेक्षते ॥ एतदित्यादि ॥ एतच्छब्देन वसुदेवः॥ वसुदेवसुतस्य भगवतश्चरणारविंदे यथा मत्सरवी गंगा वर्त्तते तथैवैतज्जन्मनिदानभूतस्यास्यापि चरणे काचिदन्या मत्सरवी वर्त्तते किमिति प्रत्यक्षमीक्षितुमिव चेत्यर्थः॥ १६ ॥

**प० ॥ तदा सुकशिपूत्तमे स तु मुदा निधायाददे**
**त्वजामजनकोपि तं शयितनंदपत्न्या गृहे ॥ पुनः**
**प्रतिययौ तटं विटपिसंघसंसेवितं तथैवमिहिरा**
**त्मजां समवतीर्य गेहं द्रुतं॥ ३० ॥**

तदेति॥ तदा तु प्रवेशकालएवेत्यर्थः ॥ स वसुदेवः शयितनंदपत्न्याः निद्रितयशोदायाः गृहे सूतिगृहे सुकशिपूत्तमे शोभनैः कशिपुभिः कशिपु भक्ताच्छादनयोरेकोक्त्या पृथक्तयोः पुंसीति मेदिनीकोशात् आच्छादनवस्त्रैरुत्तमेऽर्थात्पर्यंके मुदा हर्षेण तं श्रीकृष्णं निधाय स्वयमजनकः सन्नपि अजांमायां आददे गृहीतवान् ॥ अपिशब्दस्वारस्यं तु स्वयं अस्य भगवतो वासुदेवस्य जनकःसन्नपि जनितं तं विहाय अजनितां मायां गृहीतवानिति॥पुनरित्यादि ॥पुनः

प्रतिनिवृत्त्य विटपिनां वृक्षाणां संघेनसंसेवितत्वाद्रात्रावतिभयंकरमपि तटं तथैव यथापूर्वं निर्भयमेव ययौ ॥तथा मिहिरात्मजां यमुनां तथैव यथापूर्वं समवतीर्य द्रुतंगेहंययौ॥द्रुतमित्यनेन इदंवृत्तं कश्चन मा वेत्त्विति तस्याऽभिप्रायःसूचितः ॥ पृथ्वीवृत्तं ॥ जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुरिति तल्लक्षणात् ॥ ३० ॥

**ग० ॥ ततः परं पूर्वमबंधनेपि तनयासान्निध्येन तथाभूते वसुदेवे तेन दूयमानमानसेव सा कन्या ऽरोदीत् ॥ १७॥**

ततइति॥ कारागृहप्रवेशानंतरं वसुदेवे पूर्वं श्रीभगवत्सान्निध्यवेलायां अबंधनेपि बंधनरहिते सत्यपि ॥ अथवा ॥ अस्य भगवतो बंधनं प्रेमबंधो यस्य तथाविधे सत्यपि तनयासान्निध्येन तनयाया मायायाः मम सान्निध्येनेवेति लुप्ताहेतूत्प्रेक्षा॥तनयस्य भगवतः असान्निध्येनेति वा ॥ तथाभूते सति बद्धे सति ॥ तस्या बंधनैकस्वभावत्वात् ॥ तेन बंधनेन कृत्वा दूयमानं मानसमंतःकरणं यस्याः सेवेति हेतूत्प्रेक्षा॥सा कन्या अरोदीत्रोदितिस्म॥श्रीभगवत्सान्निध्ये वसुदेवस्य बंधोनाभूत्॥ भगवदाज्ञयैवैतद्गृहप्राप्ताया मम सान्निध्ये न पुनर्बंधोऽस्याभूदिति खेदेनैव साऽरोदीदित्यर्थः ॥ अत्र बंधपदेन संसारबंधो निगडबंधश्चेत्युभयं विवक्षितं ॥ १७ ॥

**प० ॥ रोदनरवमवकर्ण्य प्रतिहारः प्राविशन्महीशगृहम्॥ कंसमकथयत्सोऽप्यथ शर्वाख्यामावहन् ययौ प्रथमाम् ॥ ३१ ॥**



तादृक्कन्यारोदनध्वनिश्रवणानंतरं प्रतीहारेण प्रसूतिवृत्तांतं प्रति बोधितः कंसः सरोषःसन् सूतिकागृहमगादित्याह ॥ रोदनेति ॥ पूर्वार्धयोजना स्फुटा ॥ कंसमकथयच्च ॥ अथ सोपि कंसोपि प्रथमां मन्युर्मनुर्महिनस इत्याद्येकादशरुद्रनाममध्ये प्रथमोपात्तांशर्वस्य रुद्रस्याख्यां मन्युरूपां अर्थतः आवहन्॥ मन्युर्दैन्ये क्रतौ क्रुधीत्यमरात् क्रोधं धारयन्नित्यर्थः ॥ एवंविधः सन् ययौ ॥ ३१ ॥

**ग० ॥ तदनु स दनुजमनुजो जवादनुजाशयद्वयात्पिशितं श्येन इवैनः कर्तुं कन्यां धन्यां समाचकर्ष॥ १८॥**

तदन्विति ॥ तदनु आगमनानंतरं स दनुजमनुजोदानवमानुषः कंसः श्येनः पक्षिविशेषः पिशितमिव पिशितं तरसं मांसमित्यरान्मासमिव जवाद्वेगादनुजाशयद्वयात् पंचशाखः शयः पाणिरित्यमरात् स्वकनीयस्या देवक्या हस्तद्वयात् धन्यां भगवच्छक्तित्वेन परमभागवतीं कन्यां अतएवैनः कलुषं वृजिनैनोघमंहोदुरितदुष्कृतमित्यमरात् पापं कर्तुं समाचकर्ष ॥ समिति पदेन इमां चरमां प्रजां देहीत्यादिदेवकीप्रार्थितमवगणय्याप्याकर्षितवानितिसूचितं ॥ १८

**प० ॥ खलः शिलातले स तां सतां विघातकः किल व्यपोथयत्सुकन्यकां क्रुधा कृतांतकर्मकृत्॥ तदा वियत्पथे गता ऽब्रवीद्विभूषिता ऽऽयुधैरिपुर्वपुर्विनाशकस्तवापि जन्मितां गतः॥ ३२॥**

अनंतरं कंसेन शिलातले पोथिता सा ऽऽकाशं गत्वा मया हतया

किं त्वदीयः शत्रुः क्वापि जातो वर्ततइत्युक्तवतीत्याह॥खलइति॥सः
तामितिच्छेदः॥जन्मितां जन्म गतः प्राप्तः॥व्यपोथयत् अघातपूर्वक
माक्षिप्तवान्॥शेषं स्पष्टं ॥ जरौ जरौ जगाविदं वदंति पंचचामर
मिति तल्लक्षणात्पंचचामरं वृत्तं ॥ ३२ ॥

**ग० ॥ ततोमद्भुजसंख्याप्रपूरकोमन्मातृगर्भस्त्वां
मद्दशां प्रापयिष्यतीत्येवमिव सूचयंत्या व्योमव
र्त्मन्यष्टभुजावलंबिन्या देव्या दिव्यां वाणीमित्थमु
त्थितामथाऽवकर्ण्य तौ दंपती क्षमावंतौ क्षमात
लमालंब्य पक्ष्मलीकृतक्षमोमंक्षु क्षमापयंस्तत्क्ष
णं दुष्टतया सह स्वहृद्गुहागृहाद्वैरमिव स्वैरं कारागृ
हाद्देव्या देवक्या सह वसुदेवमपि स निःसारया
मास॥ १९॥**

ततइति ॥ ततः पक्ष्मलीकृता विस्तारिता क्षमा क्षांतिर्येन स तथा
भूतस्सः कंसः मंक्षु शीघ्रं॥मंक्षु द्राक् सपदि द्रुते इत्यमरः॥ क्षमा
वंतौ तौ दंपती देवकीवसुदेवौ कर्मभूतौ क्षमामवलंब्य साष्टांगं प्र
णम्येत्यर्थः ॥ क्षमापयन् मयि क्षमां कुरुतमिति प्रार्थयन्नित्यर्थः॥
तत्क्षणं तस्मिन्क्षणे स्वहृद्गुहागृहात् दुष्टतया सह वैरमिव ॥ स्वहृ
दयाद्दुष्टत्वं वैरं च यथा निःसारयामास तथेत्यर्थः ॥ स्वैरमित्या
दि ॥ अर्थयोजने स्पष्टे ॥ किंकृत्वा ॥ मद्भुजेत्यादि ॥ मम येभुजा
स्तेषां या संख्या अष्टत्वसंख्या तत्पूरकोयोमन्मातृगर्भः ॥ अष्टमो
देवकीगर्भइत्यर्थः ॥ मद्दशां इदानीं भवद्दत्तां मदीयामवस्थामुच्चप्र



देशात्पातनपूर्वकं मारणमितियावत् ॥ प्रापयिष्यतीत्येवं सूचयंत्या
इव अष्टभुजाऽवलंबिन्याः देव्याः सकाशाद्व्योमवर्त्मनि उत्थितां
इत्थं तव शत्रुर्जातइति प्रकारेण ॥ मंगलाऽनंतरारंभप्रश्नकार्त्स्न्येष्व
थो अथेत्यमरात् अथशब्दः कार्त्स्न्ये ॥ कृत्स्नां वाणीमवकर्ण्य श्रु
त्वा ॥ १९ ॥

**प० ॥ अन्वेषितुं दुष्टतया निलीनं द्वेषं स वै तन्मु
खहृद्गुहासु ॥ समाह्वयन्मंत्रविदां विनिघ्नानाज्ञा
पयामास सतां विघाते॥ ३३॥**

अन्वेषितुमिति ॥ सः कंसः मंत्रविदां मध्ये विनिघ्नान् मंत्रिणः स
माह्वयत् सतां विघाते विषये आज्ञापयामास चेत्यन्वयः ॥ मंत्रि
समाह्वानविषये कारणमुत्प्रेक्षते ॥ अन्वेषितुमित्यादिपूर्वार्द्धेन ॥ दे
वीवाक्श्रवणानंतरं दुष्टतया सह निलीनं द्वेषं तन्मुखहृद्गुहासु ते
षां मंत्रिणां मुखगुहासु भाषणद्वारा तदनुरूपतया हृद्गुहासु च
अन्वेष्टुं शोधयितुमिवेति लुप्तोत्प्रेक्षा ॥ भाषणानुरूपतया हि हृद
यं ज्ञायतइति प्रसिद्धं ॥ पूर्वं देव्या वाचं श्रुत्वा स्वमनसोनिःसा
रितं द्वेषं दुष्टतां च पुनर्दुष्टमंत्रिषु शोधयितुमिवेत्यर्थः॥उपजाति
र्वृत्तं ॥ ३३ ॥

**तं ते चैवमब्रुवन्॥ प० ॥ लेख्यां वै पत्रघटितां वा
हिनीं वीक्ष्य बालकः ॥ नो बिभेत्यपि तां क्षिप्रं
नाशयिष्यामहे वयं॥ ३४॥**

तमिति॥तं कंसं ते मंत्रिणः॥लेख्यामिति॥यामितिशेषः॥यांलेख्यांले
खनार्हां अथच लेखेभ्योदेवेभ्योहितां पत्रघटितां पत्रे लेखनाधा

रभूते चित्रपटे इति यावत् ॥ घटितां संबद्धां अथच पत्रं वाहनपक्षयोरित्यमरात्पत्रैर्वाहनैर्गजाश्वादिभिर्घटितां युक्तां वाहिनीं सेनां वीक्ष्य बालकोपि नो बिभेति तां देवसेनामपि वयं क्षिप्रं नाशयिष्यामहे ॥ वै निश्चये ॥ चित्रलिखितसेनावलोकनेनेव यदवलोकनेन बालकोपि न बिभेति किमु वयमितिभावः ॥ ३४ ॥

ततस्तैस्तथा कृते सति ॥ प० ॥ देवास्ते देवकत्वं वै प्राप्ताः कंसेन कंसिताः ॥ सुनासीरोऽप्यनासीरोऽभूत्कुनासीरभीतितः ॥ ३५ ॥

ततइति ॥ कव्युक्तिरियं ॥ ततोमंत्रणानंतरं तैः कंसानुगैर्दैत्यैस्तथा मंत्रणानुरूपे कृते प्रारब्धे सति ॥ देवाइति ॥ ते देवाः कंसेन कंसिताः शासिताः संतः ॥ कसिगतिशासनयोरित्यदादेर्णिजंतस्यनिष्ठांतं ॥ वै निश्चयेन देवकत्वं अल्पदेवत्वं कुत्सितदेवत्वं वा ॥ अल्पे कुत्सिते वा कः ॥ अथवा देवप्रतिकृतित्वं ॥ देवप्रतिमावदव्यापारत्वमित्यर्थः ॥ इवे प्रतिकृताविति कन् ॥ तत् प्राप्ताः ॥ तथा सुनासीरोपि सुष्ठु नासीरं सेनामुखंतुनासीरमित्यभिधानात् सेनामुखं यस्येति सुनासीर इंद्रोपि कुनासीरभीतितः कुत्सितं आसुरत्वान्नासीरं यस्य तस्मात्कंसाद्या भीतिस्तस्याइति ततो हेतोः अनासीरः सेनामुखरहितः अभूत् ॥ कंसभयेन सर्वदेवसेनायाः पलायितत्वादिति भावः ॥ सुनासीरः कुनासीरभीतितोनासीरइति चित्रं ॥ ३५ ॥

श्रीमन्नंदल्हदब्जफुल्लकरणश्रीभास्वदग्रेसरः श्रीमन्मातृमनोरथोदधिवरप्रोल्लासकश्चंद्रमाः ॥ श्रीगो





पीजनवृंदकोकिनिचयश्रीमत्सुमेघागमः श्रीगोवर्द्धनधारकः किल मुदा प्रादुर्बभूव व्रजे ॥ ३६ ॥

एतावता मथुरावृत्तं संवर्ण्यैदानीं गोकुलस्थं तत्प्रस्तोतुं प्रथमं गोकुले नंदगृहे श्रीभगवत्प्रादुर्भावमाह ॥ श्रीमदिति ॥ योजना स्फुटा ॥ श्रीमदिति ॥ श्रीमन्नंदल्हदब्जफुल्लकरणे ॥ अत्रफुल्लेतिभावप्रधानो निर्देशः ॥ फुल्लत्वकरणेइत्यर्थः ॥ श्रीभास्वदग्रेसरः प्रसिद्धद्वादशसूर्यापेक्षया श्रेष्ठः ॥ एतेन यस्य भासा सर्वमिदं विभातीतिश्रुतेः सर्वतेजोऽवभासकत्वेनोदयास्तोपरागादिराहित्येन च प्रसिद्धसूर्यापेक्षया वैलक्षण्यं ध्वन्यते ॥ उदधिवर इत्यत्र वरपदेन वृद्धिन्हासाद्यनेकविधदोषराहित्येन प्रसिद्धसमुद्रवैलक्षण्यं श्रीमत्सुमेघागम इत्यनेन सर्वदा रसपूर्णत्वेन वर्षाकालानपेक्षत्वेन वाताद्युपघातराहित्येन च प्रसिद्धमेघापेक्षया वैलक्षण्यं च ध्वन्यते ॥ श्रीगोवर्द्धनधारक इत्यनेन निःसाधनभक्तरक्षकत्वेन पूर्णपुरुषोत्तमत्वमस्य बोधितं प्रादुर्बभूवेत्यनेन लौकिककर्माद्यपेक्षाऽन्यसाधारणजन्मराहित्यं ध्वनितं ॥ व्रजाधिकरणकः प्रादुर्भाव इत्यनेन सर्वदा तत्र स्थितावपि विशेषणत्रयोपात्तप्रयोजनसिद्ध्यर्थं लौकिकदर्शनयोग्यरूपेण प्रकटोऽभूदिति ध्वनितं ॥ शार्दूलविक्रीतं वृत्तं ॥ ३६ ॥

ग० ॥ अथो आत्मसंभवसंभवश्रवणसंभूताऽऽल्हादभरभरितांतःकरण आत्मकुलाभरणमतिसंमोदेक्षणजवारिणा सह यामुनेन तेन विहितस्नानः स्थूललक्ष्यलक्षधुरीणान्वेषणे लक्षीभूत आहूतैः पुरुहूतपुरोहितप्रभावैर्महानुभावैर्विप्रैः क्षिप्रं

**कृतस्वस्त्ययनादिकृत्यस्तेभ्यस्तदा मुदा दानानि दातुं नंदः समुद्युक्तो बभूव॥ २०॥**

अथोइति ॥ भगवत्प्रादुर्भावानंतरं ॥ आत्मसंभवेति ॥आत्मसंभवः पुत्रस्तस्य यः संभव उत्पत्तिरित्यादि स्फुटं॥ आत्मसंभवपदेन स्वीयाग्रिमचरित्रनिर्वाहाय भगवतस्तादृशप्रेरणवशादात्मनः सकाशादेवाऽयमुत्पन्न इति नंदस्य बुद्धिरुत्पन्नेति सूचितं ॥ आल्हादेत्यादिना अंतःकरणप्रतीत्याऽपिममैवायं पुत्र इति निश्चितवानितिसूचितं ॥ इदं च नंदस्त्वात्मजउत्पन्नइत्यादिश्लोकसुबोधिन्यां स्पष्टं ॥ आत्मकुलेति ॥ आत्मनः स्वस्य यत्कुलं तस्याऽऽभरणं भूषणभूतः॥ आभरणशब्दस्याऽजहल्लिंगत्वं ॥ संमोदः पुत्रजननप्रयुक्तानंदस्तेन कृत्वा यदीक्षणजं वारि नेत्रजन्यानंदाश्रूदकं तेन सह यामुनेन यमुनासंबंधिना तेन वारिणा विहितस्नानः कृतपुत्रजननिमित्तस्नानः ॥ स्थूलेति ॥ स्युर्वदान्यः स्थूललक्ष्यदानशौंडा बहुप्रदेइत्यमरात् स्थूललक्ष्याणां दानशौंडानां यल्लक्षं शतगुणितं सहस्रं ॥ अनंता दानशौंडा इत्यर्थः ॥ तस्मिन् योधुरीणो धुरंधरस्तस्यान्वेषणे शोधने सति यो लक्ष्मीभूतः लक्ष्यमिव संपद्यमानः ॥ दानशौंडाग्रगण्यइत्यर्थः ॥ आहूतैरित्यादि ॥ अर्थयोजने स्फुटे ॥ पुरुहूतेति ॥ पुरुहूत इंद्रस्तस्य पुरोहितोबृहस्पतिस्तद्वत् प्रभावो येषांतैः ॥ २०॥

**प० ॥ सप्तदिनान्यथ सोऽद्रिं धर्तेति स्नेहतस्स्वकुलरत्नम्॥ तत्सूचनाय नंदः सप्त तिलाद्रीन् सरत्नकान् प्रादात्॥ ३७॥**

अथ नंदः पुत्रप्रादुर्भावनिमित्तं सप्ततिलाद्रीन् रत्नसहितान् ब्राह्म



णेभ्योदत्तवांस्तदेवोत्प्रेक्षापूर्वकं वर्णयति॥सप्तेति ॥ अथ स्वकुलरत्नं सः तनयः अग्रे स्नेहतः वर्षावातार्दितगोकुलरक्षणविषयप्रेम्णा सप्तदिनान्यद्रिं गोवर्धनं धर्ताधरिष्यति इत्येतत्सूचनाय॥यद्वा॥अद्रिंधर्ता इतिहेतोर्यः स्नेहो भगवद्विषयो नंदनिष्ठस्तस्मादिति ततः ॥ तत्सूचनाय सरत्नकान् सप्ततिलाद्रीन् प्रादात्॥अग्रे गोकुलरक्षणार्थं स्नेहपूर्वकं ध्रियमाणपदार्थस्याद्रित्वसूचनाय तिलाद्रयोदत्ताः॥धारणस्य सप्तदिनपर्यंतत्वसूचनाय देयानामद्रीणां सप्तत्वं ॥ धारकस्य स्वकुलरत्नत्वसूचनाय देयेष्वद्रिषु सरत्नत्वमिति भावः ॥ गीतिरार्यावृत्तं ॥ ३७ ॥

**सुवर्णानां कुलस्त्रीणामंबराणि हरिष्यति॥ तच्छांत्यै तान्यदान्नंदो ज्ञात्वा किं हरिरादृतः॥ ३८॥**

अथ ब्राह्मणेभ्योनानाविधानि वस्त्राणि सुवर्णं च दत्तवांस्तदेवोत्प्रेक्षापूर्वकमाह ॥ सुवर्णानामिति ॥ हरिः अन्वर्थनामा ॥ वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरइत्यमरात् शोभनोवर्णः स्तुतिः शारीरोगौरत्वादिगुणो वा यासां तासां सुवर्णानां कुलस्त्रीणां अंबराणि हरिष्यतीति ज्ञात्वा नंदः आदृतः सन् तच्छांत्यै किं तान्यदादिति योजना ॥ तच्छांत्यै तस्य हरणजन्यदोषस्य शांत्यै ॥ तानि सुवर्णवस्त्राणि ॥ ३८ ॥

**यदेकगोदानविधानतः पुरा बलिः कुदातत्यगमत् प्रसिद्धताम्॥ अहं तु कृत्वा बहुशस्तदेव वै सुदातृतां संप्रथयामि भूतले॥ ३९ ॥**

नंदकर्तृकगोदानमुत्प्रेक्षापूर्वकं वर्णयति ॥ यदित्यादियुग्मेन ॥ यद्य

स्मात्कारणाद्दातृशिरोमणिरपि बलिः पुरा ॥ एकेति ॥ एकंच त द्गोदानं च स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजलइत्यमरात् भूदानं श्लेषेण धेनुदानं तस्य विधानतः करणात् ॥ कुदातेति ॥ कोः गो त्रा कुः पृथिवी पृथ्वीत्यमरात् पृथ्व्याः दातेति ॥ श्लेषेणकुत्सित दातेति ॥प्रसिद्धतां प्रसिद्धिमगमत् तत्तस्मादहं तु बहुशस्तदेव गो दानमेव कृत्वा भूतले सुदातृतां उत्तमदातृत्वं सम्यक् प्रथयामि प्र ख्यापयामि ॥ प्रथप्रख्याने ॥ वंशस्थं वृत्तं ॥ जतौतु वंशस्थमुदीरि तं जरौ इति तल्लक्षणात् ॥ ३९ ॥

**इतीव विप्रवर्येभ्यो गोपवर्यः समुत्सुकः ॥ गोध नानि धनं प्रादात्सूतादिभ्यश्च यत्नतः॥ ४० ॥**

इतीवेति स्पष्टं ॥ गोपवर्योनंदः ॥ ४० ॥

**चंदनजलसंसिक्तं ध्वजकदलीतोरणादिभिर्युक्त म्॥ गोकुलमथ ते गोपाश्चकुर्नंदात्मजोदयाऽऽल्हृ ष्टाः॥ ४१ ॥**

अथ गोपा गोकुलं चंदनरससेचनादिना ऽलंचक्रुरित्याह ॥ चंदने ति ॥ योजना स्पष्टा ॥ नंदेति ॥ नंदात्मजस्योदयेन आल्हृष्टा अ तिशयितहर्षयुक्ताः संतः ॥ ४१ ॥

**सस्नेहान्वै कर्ता पीतपटप्रोंछनादिना कृष्णः ॥ इति गोवृषवत्सतरांस्तैलहरिद्रासुरूषितांश्चक्रुः॥ ४२॥**

अथ गोपा गोवृषवत्सतरांस्तैलहरिद्रादिभिरलंचक्रुस्तदुत्प्रेक्षापूर्वक माह ॥ सस्नेहानिति ॥ गोपाइति शेषः ॥ तैलहरिद्राभिः सुरूषि



तान् लिप्तान् ॥ शेषं स्फुटं ॥ भगवान् पीतपटेनांगमार्जनपूर्वकं स स्नेहान्प्रेमयुक्तांस्तान्करिष्यतीति हेतोः प्रथममेव तान् तैलहरिद्रादि लेपेन गोपाः संभावयांचक्रुरितिभावः ॥ सस्नेहानित्यत्र स्नेहपदे श्लेषेण प्रेमतैलयोरभेदाध्यवसायो बोध्यः ॥ ४२ ॥

**ग० ॥ अथ नंदनंदनजननाकर्णनजातानंदसं दोहशबलमानसाः सकलतद्देशवासिनः किल बभूवुः॥ सर्वाः सरूपा अपि निरुपमरूपाश्च श्रु तिरूपा गोप्यः स्नेहाकूपारप्लवनव्यापारपरवशांतः करणाः स्वर्णमणिगणभूषणदुकूलांजनप्रभृतिभू षितविग्रहा गृहात्परिगृहीतमांगल्यसाहित्याः प्र त्याहिततद्दर्शनाभिलाषा भाषामंगलप्रबंधं गायं त्यः सानंदं नंदसदनमभिसस्रुः ॥ २१ ॥**

अथेत्यादि ॥ अथ सकलास्तद्देशवासिनो व्रजवासिनः ॥ नंदेति ॥ नंदंति जनाअनेनेति नंद इतिव्युत्पत्त्या स्वयमानंदजनकः॥ अक र्तरि च कारके संज्ञायामिति घञ् ॥तस्यापि यो नंदनः नंदयतीति नंदनः आनंदजनकः पुत्रस्तस्य यज्जननं तस्याकर्णनेन श्रवणेन जातोय आनंदसंदोहः अगणितानंदइत्यर्थः ॥ तेन शबलानि व्या प्तानि मानसानि येषां ते तथाविधाः बभूवुः किल ॥ सरूपाइति॥ समानं परस्परेण तुल्यं रूपं यासांता अपि निरुपमं रूपं यासां ता निरुपमरूपा इति विरोधाभासः ॥ परिहारस्तु रूपेण सौंदर्येण स हिता इति ॥ अलौकिकरूपत्वेन तुल्यत्वेऽपिलौकिकोपमाराहि त्यान्निरुपमत्वमिति वा ॥ अलौकिकत्वमेवाह ॥ श्रुतिरूपाइ

ति ॥ गोपीनां श्रुतिरूपत्वं बृहद्वामनीयपुराणे उत्तरे खिले भृगुं प्रति ब्रह्मवाक्यं ॥ न स्त्रियो व्रजसुंदर्यः पुत्र ताः श्रुतयः किलेति ॥ सर्वा गोप्यः सानंदं नंदसदनं अभिसर्तुं गंतुं निर्जग्मुरित्यर्थः ॥ किंभूता गोप्यः ॥ स्नेहेत्यादि ॥ स्नेहाकूपारे स्नेहाब्धौ यत्प्लवनं तरणं तद्व्यापारस्य परवशं आधीनमंतःकरणं यासां तास्तथाविधाः॥तथा॥स्वर्णेत्यादिविशेषणद्वयं॥स्फुटं॥ मांगल्यसाहित्यमक्षतदूर्वाकुंकुमादिकं ॥ तथा ॥ प्रत्याहितेति ॥ स्थापितभगवद्दर्शनविषयकस्पृहाः ॥ तथा॥ भाषेति ॥ तद्देशीयानि लौकिकानि प्रसूतिगीतानि गायंत्यः ॥ अत्र विशेषणमालिकायां पूर्वपूर्वस्यांते उत्तरोत्तरस्यादौ च तुल्यः प्रासः ॥ २१ ॥

**प० ॥ ललत्कुंडलात्विट्सुगंडस्थलाद्राग्रणद्रत्नमंजीररम्यास्तदानीम् ॥ क्वणत्कंकणाश्चंद्रमुख्यो मुदा ता रतिह्रीप्रदा नंदगेहं स्ववापुः॥ ४३॥**

गमनसंभ्रमवशाच्चंचलकुंडलकांत्यलंकृतगल्लाः सशब्दमंजीररम्याः शब्दायमानकंकणाश्चंद्रवदनाः स्वरूपातिशयेन रतेरपि लज्जाप्रदास्ता नंदगेहं प्राप्तवत्य इत्याह ॥ ललदिति ॥ अतएव रणदिति ॥ स्ववापुः सुष्ठु मनसि विविधमनोरथकरणपूर्वकमवापुः ॥ शेषं स्फुटं॥ भुजंगप्रयातं वृत्तं ॥ ४३ ॥

**तत्र किल ॥ अनेककल्पार्जिततापमार्जनं तपःफलं तं सुखदं निरीक्ष्य ताः ॥ हृत्सद्मनि न्यस्य विनेमुरावृता युक्ताशिषस्तस्थुरहो रमासमाः॥ ४४ ॥**

तत्रेति ॥ उत्तरान्वयि ॥ अनेकेति ॥ ताः गोप्यो यतो रमासमाः अ



तः तं श्रीकृष्णं ॥ अनेकेषु कल्पेष्वर्जितो यः संसारतापस्तस्य मार्जनकर्तारं ॥ तथा ॥ तावत्स्वेव कल्पेषु कदाचित्संपादितस्य तपसः फलरूपं अतएव सुखदं नितरां अलौकिकभावदर्शनप्रयुक्तविचारपूर्वकमवलोक्य सादराः सत्यः स्वहृदि न्यस्य स्थापयित्वा नेमुः मानसिकमेव प्रणामं चक्रुः ॥ इदं तु परमार्थदृष्ट्या ॥ लोकरीत्या तु आदृताः यशोदाप्रभृतिभिः सत्कृताः सत्यः आशिषो दत्वा तस्थुः॥ लोकदृष्ट्या तु नमस्कारपूर्वकमाशीःप्रदानमाश्चर्यरूपं तत्सूचकं अहो इति ॥ इंद्रवंशावंशस्थयोरुपजातिर्वृत्तं ॥ ४४ ॥

**ग० ॥ तदा मुदा गोपाः सोपायनपाणयो मणय इव मुक्तावलंब्यगतयो धनदइवविविधनिधिपतयः कोकिला इव माधवागमहृष्टमतयस्ते घुसृणागुरुरूषिता भूषणभरभूषिताः संभ्रमान्नंदभवनमभिययुः॥ २२॥**

तदेति ॥ तदा प्रादुर्भावानंतरसमये ते गोपाः सोपायनपाणयः उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरादुपहारसहितपाणयः संतः मुदा हर्षेण संभ्रमात्त्वरया नंदभवनमभिययुः ॥ संभ्रमस्त्वरेत्यमरः ॥ कीदृशाः ॥ मणयइवेति ॥ मुक्तेति ॥ मुक्तैरपि अवलंब्या आश्रयणीया गतिः सरणिर्येषांते तथाविधाः ॥ पक्षे ॥ मुक्ताभिर्मौक्तिकैरवलंब्या गतिः सरणिर्येषां ते॥ पुनःकीदृशाः ॥ धनदइवेति ॥ धनदइव कुबेरइव ॥ विविधेति ॥ विविधा ये निधयो धननिक्षेपस्थानानि ॥ पक्षे ॥ महापद्मादयस्तेषां पतयः॥ उपमानोपमेययोः समानविभक्तिकत्वस्यैव नियमो नलिंगवचनयोः ॥ पुनःकीदृशाः ॥ को

किला इवेति ॥ माधवेति ॥ माधवः श्रीकृष्णः पक्षे वसंतः॥ घुसृणं कुंकुमं ॥ शेषं विशेषणद्वयं सुगमं ॥ २२ ॥

**प० ॥ तदोपदां न्यस्य गवेंद्रसन्निधौ सुखोदधौ ते मनसा ऽथ संप्लुताः ॥ दधुस्सुवस्त्राभरणानि पूजितास्तेन प्रदत्तानि महाशयाः शुभाः ॥ ४५ ॥**

तदेति ॥ ते गोपाः ॥ गवेंद्रसंनिधौ गवां धेनूनामिंद्रः स्वामी नंदस्तत्संनिधौ महान् विचारादिसंपन्न आशयोंऽतःकरणं येषां तथाविधाः ॥ यद्वा॥महांतो बहुदानशीलाः शया हस्ता येषां ते तथाविधाः ॥ तेन नंदेन ॥ अस्य पूजिता इत्यनेन प्रदत्तानीत्यनेन च संबंधः ॥ शेषं सुगमं ॥ पूर्ववदुपजातिर्वृत्तं ॥ ४५ ॥

**नंदनामोदसंयुक्ते सुमनोमालयांऽचिते॥ पयोदानुचरे नंदे गवेंद्रत्वं क्षमं क्षितौ ॥ ४६ ॥**

नंदे गवेंद्रत्वं श्लेषभंग्याऽपि द्रढयति ॥ नंदनेति ॥ पुत्रप्रयुक्तहर्षयुक्ते ॥ अथच ॥ नंदनवनसंबंधिसौगंध्ययुक्ते ॥ सुमनोमालयेति॥ सुमनसां साधूनां पुष्पाणां वा मालया पंक्त्या समूहेनेति यावत् स्रजा च अंचिते भगवदुत्पत्तिनिदानतया पूजिते युक्ते वा ॥ अथ च ॥ देवपंक्त्या अंचिते ॥ पयोदेति ॥ पयोदुग्धं ददति ते पयोदा गोपा गावो वा ते अनुचरा यस्य तासां वा अनुचरस्तस्मिन् ॥ अथच ॥ पयोदैर्मेघैरनुचरतीति पयोदानुचरस्तस्मिन् ॥ मेघवाहनत्वात् ॥ एवंविधे नंदे क्षितौ पृथिव्यामपि गवेंद्रत्वं गवामिंद्रः स्वा





मी तस्य भावस्तत्त्वं ॥अथच गोः स्वर्गस्य इंद्रस्तस्य भावस्तत्त्वं क्षमं योग्यं ॥ ४६ ॥

**यशोदः सर्वदातॄणां सूनुर्भार्याऽपि तादृशी॥ तस्यास्य यशसां राशिर्ववृधे नो क्षमं किमु॥ ४७॥**

यशोद इति ॥ सर्वदातॄणां यशोदः यशःप्रदाता ॥ सर्वदातॄणांयशःप्राप्तिरेतस्मादेव भवति सर्वकर्मफलदातृत्वात् ॥ एवंविधो यस्य सूनुः पुत्रः श्रीकृष्णः भार्याऽपि यशोदा अन्वर्था तस्यअस्य नंदस्य यशसां राशिर्ववृधे इति नो क्षमं किं अपितु क्षममेव ॥ ४७ ॥

**तत्र तदवसरे ॥ मृदंगोऽपि ह्यहं श्लाघ्यो जातो विष्णुपदोद्भवैः ॥ गुणैरितीव तज्जन्मन्यसृजन्मधुरध्वनिं ॥ ४८ ॥**

तत्रेति ॥ तत्र गोकुले ॥ तदवसरे श्रीभगवत्प्रादुर्भावावसरे ॥ इदमुत्तरत्रान्वेति ॥ मृदंगादिवाद्यध्वनिमुत्प्रेक्षापूर्वकं वर्णयति ॥ मृदंगइत्यादिश्लोकचतुष्टयेन ॥ अहं मृदंगो वाद्यविशेषः श्लेषेण मृदेवांगं यस्य स मृदंगो ज्ञानैकलेशविधुरो जडइतियावत् ॥ एवंविधः सन्नपि ॥ हि यस्मात् ॥ विष्णिवति॥विष्णोर्भगवतः पदादुद्भवोयेषां तैः ॥ अथ च वियद्विष्णुपदं वेत्याकाशपर्यायेष्वमराद्विष्णुपदमाकाशं तस्मादुद्भवो येषां तैर्गुणैः शब्दैः कृत्वा श्लाघ्यो जातोऽस्मीतीव हेतोः तज्जन्मनि भगवज्जन्मसमयइत्यर्थः ॥ मधुरध्वनिमसृजत्कृतवान् ॥ ४८ ॥

**मन्निदानाभिधां धत्त एतस्य जनकस्त्विति ॥ स्व**

न आनकदुंदुभ्योर्वक्ष्ये स विचार्य किं॥ ४९॥

मदिति ॥ तथा स आनकदुंदुभ्योः पटहभेर्योः स्वनः शब्दः इति विचार्य वक्ष्ये किमित्युत्प्रेक्षायां ॥ इति किं ॥ एतस्य भगवतो जनकः पिता वसुदेवस्तु ॥ मदिति ॥ मम निदानमुत्पत्तिकारणं यावानकदुंदुभीतयोर्मिलितयोरभिधां नामानकदुंदुभिरिति धत्ते धारयति ॥ ४९ ॥

तूर्यभेर्यादिवाद्यानि हरिर्हर्तेतिनिश्चयात्॥ अंबरं जगृहुः सम्यक् तद्गुणं मंगलोचितं॥ ५०॥

तूर्येति ॥ तूर्यभेर्यादिवाद्यानि कर्तॄणि ॥ हरिरंबरं गोपिकावस्त्रं ॥ जात्यैकत्वादेकत्वं ॥ श्लेषेणाकाशं हर्ता हरिष्यतीति निश्चयात् ॥ हेत्वर्थे पंचमी ॥ निश्चयं विधायेवेति ल्यब्लोपे वा पंचमी ॥ लुप्तोत्प्रेक्षा ॥ मंगलोचितं मंगलकालयोग्यं तद्गुणं तस्यांबरस्य गुणं शब्दाभिधं सम्यक् जगृहुः ॥ गुणिनि हृते तत्समवेता गुणा अपि हृता भविष्यंतीत्यस्माकं गुणलाभो न स्यादित्याशयेन पूर्वमेव तद्गुणसंग्रहं चक्रुरितिभावः ॥ ५० ॥

भौमानीमानि वै वाद्यान्यपि संजगृहुर्गुणान्॥ खस्येति नियतं मन्ये तत्र विष्णुपदोद्भवात् ५१॥

सामस्त्येन वाद्यध्वनिमुत्प्रेक्षापूर्वकं वर्णयति॥ भौमानीति॥भौमान्यपि भूमिसंबंधीन्यपि इमानि वाद्यानि तत्र जन्मसमये खस्याकाशस्य गुणान् शब्दान् जगृहुः ॥ अत्र उत्प्रेक्षते ॥ नियतमिति ॥ नियतं निश्चितं ॥ विष्ण्वति ॥ विष्णोः पदस्य चरणस्योद्भवात् ॥ यद्वा विष्णोस्तत्पदस्याक्षरब्रह्मात्मकस्य धाम्नः बलभद्रस्य च उद्भवात् प्रादुर्भावाद्धेतोः ॥ बलभद्रस्य भगवद्धामरूपत्वं तु ॥ देवक्या उदरे गर्भं शेषाख्यं धाम मामकं ॥ तत्संनिकृष्य रोहिण्या उदरे संनिवेशयेति श्रीमद्भागवते भगवद्वचने स्फुटं ॥ वस्तुतस्तु विष्णुपदमाकाशं तस्माद्य उद्भवस्तस्माद्धेतोरित्यहं मन्ये॥अत्र तेषामित्यार्थिकं॥५१॥



ग० ॥ तदवसरे निरवधिहर्षोदधिकृतमज्जना मिलज्जनास्तत्कांतिविशिष्टतद्यशसेव हरिद्रामिलितदधिदुग्धादिना परिपूरितकलशकलितकरतलाः परस्परं दत्तकरताला मेघमाला इव कृततद्दृष्टयः संभ्रमभरचंचलितदृष्टयस्ते नानामणिगणकिरणवर्णविचित्रिते नंदसदनांगणे गणशस्सानंदं ननृतुः॥ २३॥

तदवसरेइति ॥ तदवसरे श्रीभगवज्जन्मसामयिकवाद्यवादनावसरे ते मिलज्जना मिलितागोपाः ॥ नानेति ॥ स्पष्टं ॥ गणशः संघशः सानंदं यथा स्यात्तथा ननृतुः ॥ कीदृशाः॥निरवधीति ॥ स्पष्टं ॥ पुनः सोत्प्रेक्षं विशेषणमाह ॥ तत्कांतीति ॥ तस्य नंदस्य या कांतिः स्वर्णसदृशं तेजस्तद्विशिष्टं यत्तद्यशो नंदयशस्तेनेव ॥ शेषं सुगमं ॥ तथा ॥ परस्परमिति ॥ स्फुटं॥ पुनः सोपमं विशेषणमाह॥ मेघेति॥ कृततद्दृष्टयः कृतदधिदुग्धवृष्टयः॥ तथा ॥ संभ्रमेति ॥ स्पष्टं ॥२३॥

प० ॥ वपुषा तुंदिलो नंद आनंदेनाऽपि तादृशः॥ शिक्षयन्निव वै सूनुं नृत्यति स्म मुदा मुहुः॥ ५२॥

वपुषेति ॥ वपुषा शरीरेण तुंदिलः प्रशस्तं तुंदमुदरं यस्यसः॥ आनं

देनाऽपि तादृशस्तुंदिलः अत्यानंदविशिष्ट इति यावत् ॥ मुदा पुत्रजन्मप्रयुक्तहर्षेण मुहुः पुनःपुनर्नृत्यति स्म ॥ स्मयोगे भूते लट् ॥ उत्प्रेक्षते ॥सूनुं पुत्रं शिक्षयन्निव॥ बालशिक्षणे हि गुरुणा एकमेव शिक्षणीयं वारंवारमभ्यस्यते इति प्रसिद्धं ॥ ५२ ॥

**दधिदुग्धाब्धिः शुशुभे नररत्नैः संकुलस्तदा हरिणा॥ रहितस्तच्छयनार्हस्तरंगमाली किमागतो विकृतः॥ ५३॥**

दधीति ॥ तदा गोपनर्तनसमये दधिदुग्धाब्धिः गोपदृष्टदधिमिश्रदुग्धसमुद्रः शुशुभे ॥ अब्धिपदेन दधिदुग्धयोरपरिमितत्वं सूचितं ॥ कीदृशः ॥ नरेति ॥ प्रसिद्धश्च समुद्रः केवलरत्नसंकुलः अयं च नररत्नैः संकुल इति व्यतिरेकः ॥ उत्प्रेक्षते ॥ तदिति ॥ भगवच्छयनयोग्योऽपीदानीं हरिणा रहितः गोकुलागतत्वेन तच्छून्यः अतएव विकृतो विकारं प्राप्तः सन् दधिभावं प्राप्तः सन्निति यावत् ॥ आगतः प्राप्तस्तरंगमाली क्षीरसमुद्रः किं ॥ एतेन भगवत्संबंधिनां तद्वियोगाऽसहिष्णुतया भगवद्वियोगे विकारोदय इति सूचितं ॥ अथच श्रीकृष्णस्य पूर्णावतारत्वं व्यक्तं वेदितव्यं ॥ अन्यथा अंशमात्रेण तत्र विद्यमानत्वेन विरहाऽसंभवात् ॥ ५३ ॥

**श्रियः प्रिये श्रीव्रजमागते प्रिये श्रीरप्यहो तत्र तदा समावसत् ॥ सपत्निकाल्याकुलगोकुलं किलेत्यवेत्य नूनं सुपयः समृद्धिमत्॥ ५४॥**

तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणैरमाक्रीडमभूत्पेत्यस्यैवार्थमुत्प्रेक्षापूर्वकं वर्णयति ॥ श्रियइति ॥



श्रीर्लक्ष्मीः कर्त्री श्रियः प्रिये भगवति श्रीव्रजं श्रिया सर्वप्रियत्वादिलक्षणसंपत्त्या युक्तं व्रजं गोकुलमागते सति प्रिये तत्र गोकुले सदा समावसत् ॥ नतु कदाऽपि त्यक्तवतीत्यर्थः॥ अहो आश्चर्ये॥ इह लोके साक्षात् लक्ष्मीनिवासस्य दुर्घटत्वात् ॥ उत्प्रेक्षते ॥ सुपयःसमृद्धिमत् उत्कृष्टदुग्धसंपत्तियुक्तं॥ उत्कृष्टत्वं चाऽलौकिकत्वं ॥ नूनं निश्चयेन ॥ सपत्न्य एव सपत्निकास्तासां या आलिः पंक्तिस्तया आकुलमेवंविधं यद्गोकुलं तत् अस्तीति अवेत्य निश्चित्य ॥ किलेत्युत्प्रेक्षायां ॥ पयःसमृद्धिमति क्षीरसमुद्रे यथाऽहं प्रादुर्भूता तथातथाविधेऽस्मिन् गोकुले मत्सदृशी काचिदुदेष्यतीति बुध्या अनेकसपत्न्याकुलमिदं गोकुलं त्यक्त्वाऽहं गमिष्यामि चेन्मत्प्रियः सपत्न्यासक्तः सन्मयि निरादरः स्यादिति बुध्या च निरंतरं तत्रैववासमकरोदिति भावः ॥उपजातिर्वृत्तं ॥ ५४ ॥

**ग० ॥ तदनु कतिपयाहर्गणे कृतप्रयाणे गोपाधिपो गोकुलाकुलं गोकुलं गोप्तुं गोपेभ्यः कृताज्ञो गोरसं गोपतये दातुं गोपतावुदिते स्वयमपि प्रयाणं प्रचक्रे॥ २४॥**

तदन्विति ॥ योजना स्फुटा ॥कतिपयेत्यादि॥कतिपुचिद्दिवसेषु गतेषु सत्सु गवां धेनूनां कुलेनाऽऽकुलं व्याप्तं ॥ गोपतये पृथ्वीपतये कंसाय गोपतौ सूर्ये ॥ स्वस्य गोपाधिपत्वेन गोकुलस्य गोकुलाकुलत्वेन च गोपेभ्यआज्ञाकरणं स्वस्य च गोपतित्वेन गोपतेरुदये सत्येव गमनं राज्ञो गोपतित्वेन तस्मै गोरसदानं च युक्तमितिभावः ॥ २४ ॥

**कंसस्स्वसंज्ञार्थमथो विधातुं समादिदेशाऽऽशु स पूतनां वै॥ स्वनामभावं व्रजभाषया सा कुर्वत्यहो तत्र समाचचार॥ ५५॥**

कंसइति ॥ अथो कंसः स्वसंज्ञार्थं स्वस्य या संज्ञा कंस्ते हिनस्तीति कंस इत्यन्वर्थं नाम तस्य योऽर्थः प्रयोजनं प्रवृत्तिनिमित्तं हिंसेति यावत् तं विधातुंकर्तुं॥शेषं सुगमं॥आश्वित्यनेन नंदः परावृत्य यावद्गोकुलं गच्छति ततः पूर्वमेव त्वया मदाऽऽज्ञप्तं कर्त्तव्यमिति कंसाभिप्रायः सूचितः ॥ उत्तरार्द्धान्वयः स्फुटः ॥ तत्र व्रजे ॥ व्रजदेशीयभाषया स्वस्य यन्नाम पूतनेति तस्य भावं स्थितिं अभिप्रायंवाकुर्वती॥ तद्भाषायां हि पूतइति पुत्रवाचकं ना इत्यभाववाचकं॥पुत्रेत्यनेनोपलक्षणतया यावद्बालकानां ग्रहणं ॥तथा च बालकानां नाशं कुर्वतीत्यर्थः ॥ उपजातिर्वृत्तं ॥ ५५ ॥

**ततः क्रमेण ॥ प० ॥ श्रीदानकर्त्रीति विसूचनाय श्रीरूपधर्त्री नु बकी हरिं सा॥नंदालयं प्राप्य निजांकगं तं चकार भीर्ह्रीसुविहीनचित्ता ॥ ५६॥**

ततइत्यादि॥उत्तरान्वयि॥श्रीति॥ततः क्रमेण स्वयं बकी पूतना श्रीदानकर्त्री श्रियः श्रीर्वेषरचनाशोभासंपत्सरलशाखिषु ॥वाणीलक्ष्मीलवंगेषु विषे बिल्वेऽपीति रत्नमालाऽभिधानात् संपदः अथच विषस्य दानकर्त्रीति विशेषेण सूचनाय॥वै निर्धारणे॥नु इति उत्प्रेक्षायां॥सूचनायैव किमित्यर्थः ॥ श्रीरूपधर्त्री लक्ष्मीसदृशरूपधारिणी सती अथच रूपं स्वभावे सौंदर्ये नाऽऽलोके पशुशब्दयोः॥ग्रंथावृत्तौ नाटकादावाकारश्लोकयोरपीति मेदिनीकोशात् श्रियो विषस्य



रूपं स्वभावो हिंसकत्वमित्यर्थः ॥ तस्य धर्त्री नंदालयं प्राप्य तं स्वप्राणहारकत्वेन प्रसिद्धमपि हरिं निजांकगं निजोत्संगगतमित्यादि स्फुटं ॥ श्रीरूपधारिणीत्यनेन सर्वासां यशोदादीनां मोहजननसामर्थ्यमपि सूचितं ॥ सुविहीनेत्यत्र सुवीइत्युपसर्गद्वयेन स्वभावत एव भीर्ह्रियोरभावः सूचितः ॥ उपजातिर्वृत्तं ॥ ५६ ॥

**श्रीवसतिः किल योग्या पयोभवे किं विचार्य मनसा सा॥ इति शौरेर्मुखपद्मे तद्युक्तं संददे स्तनं क्रूरा ॥ ५७॥**

श्रीति॥श्रीवसतिः श्रीयो लक्ष्म्याः वसतिः श्लेषेण विषवसतिः पयोभवे कमले योग्या किल इति प्रसिद्धं इति मनसा विचार्य किं क्रूरा सा पूतना श्रीशौरेः मुखपद्मे तद्युक्तं स्तनं संददे ॥ अत्र श्लेषमूलको लक्ष्मीविषयोरेकश्रीशब्दोपात्तत्वरूपोऽभेदाऽध्यवसायः ॥ ५७ ॥

**ततस्तद्युक्तं स तं विलोक्य ॥ प० ॥ मच्छालकं दुष्टमपि स्तनद्वये बिभर्त्यसावित्यधिरोषनिश्चयात्॥ बकीस्तनस्थं ह्यसुभिर्हरिः पपौ विषं श्रियस्तौल्यमिव प्रकाशयन्॥ ५८॥**

ततइति ॥ स्तनदानानंतरं सः श्रीकृष्णः तं स्तनं तद्युक्तं विषयुक्तं विलोक्य हरिः बकीस्तनस्थं विषमसुभिः प्राणैः सह पपावित्यन्वयः॥अत्रोत्प्रेक्षते ॥ मदित्यादि ॥असौ बकी दुष्टमपि मच्छालकं स्तनद्वये बिभर्ति इति हेतोरधिरोषनिश्चयात् अधिकक्रोधविशिष्टनिश्चयात् विषे श्रियस्तौल्यं तुल्यत्वं प्रकाशयन् इवेति लुप्तोत्प्रेक्षा ॥

मदीयशालकस्य दुष्टस्यापि दुष्टाया अस्या हृदये स्थितिर्न युक्ते ति निश्चित्य यथैतत्सहोदर्या मदंगे स्थितिस्ततुल्यत्वादस्याऽपि त था स्थितिर्युक्ता किंच मच्छालकसहवासिनामेतत्प्राणानामपि दु ष्टाया हृदयेऽवस्थानमयुक्तमिति मनसि निधाय तत्स्तनस्थं विषं प्राणैः सह पपाविति भावः ॥ उपजातिर्वृत्तं ॥ ५८ ॥

**असूयासहितामाशु सासूयस्तां समोऽप्यहो॥ अ सुभीरहितां चक्रे सोऽसमत्वप्रसिद्धये ॥५९॥**

असूयेति ॥ समोपि सासूयः असूययेर्ष्यया सहितः सासूयः सः ह रिः ॥ असूयासहितां तां पूतनां आशु शीघ्रं असमत्वप्रसिद्धये अ र्थात्स्वस्य असुभिः प्राणैः रहितां चक्रे ॥ अहोआश्चर्यं ॥ वस्तुतस्तु मया लक्ष्म्या सहितः समः ॥ अथवा समः सर्वेषु भूतेषु तुल्यरूपः एवं सत्यपि सत्पीडकत्वानेकबालकविघातकत्वविशिष्टदुष्टपूतना विषये असमत्वं स्वप्राणहरणं कर्तुं प्रवृत्ताया अपि मातृतुल्यगति दातृत्वेन जगत्यतुलनीयत्वं वा युक्तमेव ॥ अथवा अः वासु देवः समः असमइति मयूरव्यंसकादित्वात्समासः ॥ एवंच स्वस्य पालनशक्तिमत्त्वप्रसिद्धये इत्यर्थः ॥ ५९ ॥

**ग० ॥ तदनु नासिकया बृहत्कंदरं गिरिवरमनुकु र्वती कुलिशाहताचलशृंगयुगलं स्तनाभ्यामनुभा वयंती निर्जलक्षितिप्रदेशीयांधुद्वयमक्षिभ्यां वि डंबयंती खरतरकरचरणं सेतुमिव संदर्शयंती त रुणार्णोजबंधुकिरणाकृष्टार्णःसंघह्रदमुदरेणानुन**





**यंती दंष्ट्राभिः कठिनकुप्रदेशाकर्षणत्रुटितेषामनी षामुन्मेषयंतीत्थंपंचत्वेऽप्येकं स्फुटं पृथ्वीत्वमेवानु भवंती प्रभुपादप्रचारपूतदेहा पूतना तस्यै साजा त्यं प्रदर्शयंतीव तस्यां तत्क्षणं तदा पपात॥२५॥**

तदन्विति ॥ तदनु भगवत्कृतसप्राणविषपानानंतरं प्रभुपादप्रचारपू- तदेहा पंचत्वे ऽपि मरणानंतरं पृथक्पृथक् भूतपंचकरूपत्वेऽपि इ त्थं पूर्वोक्तप्रकारेण एकं केवलं पृथ्वीत्वमेव भूमित्वमेव श्लेषेण म हतीत्वमेव स्फुटं स्पष्टं अनुभवंती पूतना तत्क्षणं तस्मिन्क्षणे तस्यै पृथिव्यै साजात्यं तुल्यत्वं प्रदर्शयंतीवेत्युत्प्रेक्षा ॥ क्रियायोगाच्चतु र्थी ॥ तस्यां पृथिव्यां तदा पंचत्वसमये पपात ॥ पृथ्वीत्वमेव विश दयति ॥ नासिकेत्यादिभिः षड्भिर्विशेषणैः ॥ आद्यं विशेषणं स्फु टं॥कुलिशेति ॥ स्तनाभ्यां इंद्रवज्राहतपर्वतशृंगयुग्मं अनुभावयंती लोकानुभवगोचरतां नयंती ॥ स्तनयुगे दृष्टे एतत्पर्वतशृंगद्वयमिति यथा जानीयुस्तथा कुर्वतीत्यर्थः ॥ निर्जलेति ॥ मरुदेशीयकूपद्व यं ॥ गहादित्वाच्छः ॥ खरतरेति ॥ कठोरतरं हस्तपादं ॥ प्राण्यंग त्वादेकवद्भावः ॥ सेतुमिव क्षेत्रादौ सीमाविभागसूचनार्थं जलधा रणार्थं वा मृत्पाषाणादिरचितं कूटमिव संदर्शयंती ॥ तरुणेति ॥ त रुणो योऽर्णोजबंधुः सूर्यस्तस्य किरणैराकृष्टोऽर्णःसंघः अंभोऽर्ण स्तोयपानीयेत्यमरात् उदकसमुहो यस्यैवंविधो यो ह्रदस्तं स्वी योदरेणानुनयंती अनुकुर्वतीत्यर्थः॥कठिनेति॥कठिनकुप्रदेशस्य कठोरभूदेशस्याकर्षणेन त्रुटिता या ईषा लांगलदंडस्तन्मनीषां त द्बुद्धिं ॥ शेषं स्फुटं ॥ २५ ॥

प० ॥ असृक्करस्सर्वशिशूच्चयस्य समाहृतोऽत्राऽश्वनयेति तं किं ॥ अन्वेषितुं योगिभिरप्यगम्यश्चिक्रीड तस्या हृदयप्रदेशे ॥ ६० ॥

असृक्करइति ॥ सः श्रीकृष्ण इतिशेषः ॥ योगिभिरपीत्याद्यन्वयः स्फुटः ॥ तद्धृदयप्रदेशक्रीडनविषये फलमुत्प्रेक्षते ॥ हियस्मात् अनया पूतनया शिशूच्चयस्य शिशुसमुच्चयस्य असृक्करः प्राणसमूहः अत्रहृदये समाहृतोऽतस्तं प्राणसमूहं आशु शीघ्रं अन्वेषितुं किमित्युत्प्रेक्षा ॥ उपजातिर्वृत्तं ॥ ६० ॥

ग० ॥ अथो बालग्रहविग्रहसमग्रद्रुमग्रामप्रपतनप्रोद्भूतप्रचंडाखंडब्रह्मांडखंडनपरश्वधध्वानाकर्णनप्रवृद्धसाध्वसधृद्धृदयास्सर्वेऽपि बभूवुः ॥ २६ ॥

अथोइति ॥ अथो अनंतरं सर्वेऽपि व्रजजनाः ॥ बालेति ॥ बालग्रहः पूतना तस्य यो विग्रहो देहस्तेन कृत्वा यत्समग्रद्रुमग्रामप्रपतनं तेन प्रोद्भूतः प्रादुर्भूतः प्रचंडो भयंकरः अखंडं संपूर्णं यत् ब्रह्मांडं तस्य खंडनविषये परश्वधः परशुभूतो यो ध्वानो ध्वनिस्तस्याकर्णनेन श्रवणेन प्रवृद्धं वृद्धिं प्राप्तं यत्साध्वसं भयं तद्धरंतीत्येवंविधानि हृदयानि येषामेवंविधाः बभूवुः ॥ २६ ॥

प० ॥ तत्रैत्य सूनुं विहरंतमेतं विलोक्य नूनं व्रजराजपत्नी ॥ मत्वा ऽथदूनं वयसा हि सूनं भयान्न जानत्युत सा निदानं ॥ ६१ ॥

अथ यशोदा तत्रागत्य तद्धृदये क्रीडंतं शिशुं विलोक्य वयसा अ-



त्यल्पं अतएव खिन्नं मत्वा भयेन तत्कारणमजानती सती त्वरया आदरेणच तमांलिग्यांगन्यासादि कृत्वा दानानि दत्वा सुखं प्रापेत्याह ॥ तत्रेत्यादिनायुग्मेन ॥ न जानतीत्यत्र नञर्थकनशब्देन समासः ॥ उपजातिर्वृत्तं ॥ ६१ ॥

तं संभ्रमसंदोहा दोर्भ्यां धृत्वा हि सस्वजे प्रेम्णा ॥ अंगन्यासं कृत्वा दत्वा दानानि निर्वृतिं प्राप ॥ ६२ ॥

तमिति ॥ तं श्रीकृष्णं ॥ संभ्रमेति ॥ संभ्रमश्चसंभ्रमश्च संभ्रमौ त्वरात्यादरौ तयोः संदोहः समूहो यस्या इति व्यधिकरणपदो बहुव्रीहिः ॥ त्वराऽत्यादरविशिष्टेत्यर्थः ॥ संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपीति मेदिनी ॥ ६२ ॥

ग० ॥ तदनंतरं संरंभभरबंधुरा धैर्यविधुराः कृतायासा व्रजवासिनोऽयः कठिनं तच्छरीरं वेति परिचिचीषयेव तन्निर्मितैः कठोरैः कुठारैस्तत्क्षणं तक्षाणः काष्ठानीवांऽगानि निकृत्य तद्वेष्टितानि विधायाऽऽशुशुक्षणिं निक्षिप्य तान्याशु संधुक्षयामासुः ॥ २७ ॥

अथ सर्वे व्रजवासिनस्तद्देहं कुठारैः खंडशः कृत्वा दग्धवंत इत्याह ॥ तदनंतरमितिगद्येन ॥ संरंभेति ॥ संरंभभरेण वेगभरेण बंधुरा व्याप्ता युक्ता इति यावत् ॥ लौहैः कुठारैः खंडनविषये उत्प्रेक्षते ॥ अयइति ॥ एतच्छरीरापेक्षया अयो लोहं कठिनं उत लोहापेक्षया एतच्छरीरं कठिनमिति परीक्षितुमिच्छयेवेत्यर्थः ॥ तदिति ॥ लो

हनिर्मितैः ॥ तद्वेष्टितानि काष्ठवेष्टितानि ॥ तानि अंगानि ॥ आशुक्षणिर्मग्निः ॥ २७ ॥

**प० ॥ शरीरभारेण विमर्दिता क्षितिश्चूर्णीकृता वृक्षचयाः स्वहेतवः ॥ काष्ठानि मत्वैवमिवप्रजज्वलुर्दग्धुं तदीयं तदतीव यत्नतः ॥ ६३ ॥**

शरीरेति ॥ काष्ठानि कर्तॄणि एवं मत्वेव तदीयं पूतनासंबंधि तच्छरीरं दग्धुं अतीव यत्नतोऽत्यंतप्रयत्नेन प्रजज्वलुः ॥ एवं कथं ॥ शरीरभारेण अर्थात्पूतनायाः ॥ क्षितिरित्यादि स्फुटं ॥ स्वनिदानभूतवृक्षचूर्णीकरणं वृक्षनिदानभूमिविमर्दनं च दृष्ट्वा तत्प्रयुक्तरोषेण काष्ठानि तद्देहमतियत्नात् दहंतिस्मेत्यर्थः ॥ इंद्रवंशावंशस्थयोरुपजातिर्वृत्तं ॥ ६३ ॥

**ग० ॥ अनंतरमनंतरैधमानधनंजयजनितधूमधोरणीभिरभ्रमपि निजसंगतिगुणात्सुभगवसुंधरागुणगुंफितं कुर्वतीभिः किमिदमिति संशयानैर्बाल्यमित्रस्य पवित्रस्य कांत्याऽपि काल्यमित्रस्य वसुदेवस्य कथनेनोत्पातशंकाशबलाशयैः शरणं हरिमेव भावयद्भिः ॥ २८ ॥**

**प० ॥ नंदाद्यैरेत्य संपृष्टं बकी किं पंचतां गता ॥ ककारपूर्वं तन्नाम जगु स्ते व्रजभाषया ॥ ६४ ॥**

अथ वार्षिककरदानार्थं मथुरां गतो गोपसहितो नंदो वसुदेवेन गोकुले बहव उत्पाताः संतीति झटिति त्वया गंतव्यमिति प्रतिबोधितः सन् गोकुलमागत्य बकीदेहदहनजन्यधूमदर्शनेन साशंको गोपान् प्रति बकीहननप्रश्नं कृतवांस्तैश्च कदैव हतेति व्रजभाषयोत्तरित इत्याह ॥ अनंतरमिति गद्येन नंदाद्यैरितिश्लोकेनच ॥ अनंतरं नंदाद्यैः मथुरापुरादितिशेषः॥एत्यागत्य बकी पूतना पंचत्वं मरणं गता प्राप्ता किमिति संपृष्टं ततस्ते व्रजवासिनः व्रजभाषया ककारपूर्वं ककारः पूर्वो यस्यतत्तन्नाम बकीनाम कबकी इत्याकारकं कदैवेत्यर्थकमित्यर्थः ॥ उत्तरमिति शेषः जगुः॥ कीदृशैः ॥ अभ्रमपि आकाशमपि ॥ निजेति ॥ स्पष्टं ॥ सुभगेति ॥ सुभगः सुंदरोयो वसुंधरायाः पृथ्व्या गुणो गंधाख्यस्तेन गुंफितं युक्तमिति यावत् कुर्वतीभिः ॥ अनंतरेति ॥ अनंतरं निरंतरमेधमानो ज्वलन् यो धनंजयोऽग्निस्ततो जनिता या धूमधोरण्यो धूमपरंपरास्ताभिः कृत्वा इदं पुरतो दृश्यमानं किमिति संशयानैः ससंशयैरित्यर्थः ॥ तथा ॥ पवित्रस्य शुद्धस्य बाल्यमित्रस्य बाल्यप्रभृति मित्रस्य कांत्या तेजसापि काल्यमित्रस्य प्रत्यूषोऽहर्मुखं कल्यइत्यमरात् कल्ये प्रातःकाले भवः काल्य एवंविधो यो मित्रः सूर्यस्तस्य तेजसा सूर्यतादात्म्यापन्नस्येत्यर्थः ॥ वसुदेवस्येत्यादिस्फुटं ॥ ॥ २८ ॥ ६४ ॥



**दयालुतां किं प्रवदाम्यहं हरेः फणींद्रवर्योऽपि न वक्तुमर्हति ॥ विषं प्रदत्तं हि यया स तत्क्षणं तस्यै व्यतार्षीदमृतं शुभोचितं ॥ ६५ ॥**

अथ कविर्भगवतो दयालुतां वर्णयति ॥ दयालुतामिति ॥ फणींद्रवर्यः शेषः ॥ व्यतार्षीत् दत्तवान् ॥ अमृतं सुधां अथच मोक्षसुखं

शेषं स्पष्टं ॥ इतरस्य विषप्रदातुरवस्था लोके कीदृशी भवतीति अनुभववान् द्विसहस्रजिव्होऽपि शेषो विषप्रदाऽयै अपि पूतनायै हरणस्वभावभगवत्कृताऽमृतवितरणं दृष्ट्वा साकल्येन तद्दयावर्णने ऽशक्तस्तत्राहं कियानिति भावः ॥ स्वमारणाय विषप्रदाऽयाः शठंप्रति शठं कुर्यादिति न्यायेन मारणे उचिते ऽपि तदविधानपूर्वकं प्रत्युत सर्वदा सानंदावस्थितिप्रयोजकामृतप्रदानं निरवधिकदयाद्योतकमितिबोध्यं ॥ इंद्रवंशावंशस्थयोरुपजातिर्वृत्तं ॥ ६५ ॥

**सानंदं नंद आलोक्य नंदनं नंदनद्रुमं ॥ भक्तानां स्नेहतस्तं वै सस्वजे मोददं द्रुतम् ॥ ६६ ॥**

अथाऽऽनंदयुक्तो नंदो भक्तकल्पद्रुमं स्वनंदनं श्रीकृष्णं स्नेहेनाऽऽलिंगितवानित्याह ॥ सानंदमिति ॥ नंदो भक्तानां नंदनद्रुमं अभीष्टदातृत्वात् अतएव वै निश्चयेन मोददं हर्षदातारं अथच सुगंधदातारं नंदनं पुत्रमालोक्य सानंदं यथा तथा स्नेहतः द्रुतं परिषस्वजे ॥ ६६ ॥

**नाऽऽश्चर्यमेतत् ॥ अग्निरुग्रोऽपि यद्योगात्काष्ठमालिंगति द्रुतं ॥ जडं तस्माद्धि लोकेऽस्मिन् स्नेहएवोत्तमोमतः ॥ ६७ ॥**

**इति श्रीबालकृष्णचंपूप्रबंधे प्रथमः स्तबकः ॥**

स्नेहतः आलिलिंगेत्युक्तं तत्र स्नेहस्योत्तमत्वमर्थांतरन्यासेन द्रढयति ॥ नाऽऽश्चर्यमेतदिति ॥ अग्निरिति ॥ उग्रोऽप्यग्निर्यद्योगात्स्नेहयोगात्तैलयोगादिति यावत् ॥ जडमपि आर्द्रमपि काष्ठं द्रुतमालिं



गति तस्माल्लोके स्नेह एव उत्तमः मतः ॥ हि प्रसिद्धं ॥ उग्रस्वभावः कश्चन जडमज्ञं नाऽऽलिंगति स्नेहतस्त्वालिंगतीतिभावः ॥

इति श्रीबालकृष्णचंपूव्याख्यायां मंजर्यभिधायां प्रथमःस्तबकः ॥ १ ॥ ॥ ५ ॥

**प्रथमः स्तबकः समाप्तः**